# नन्दनवनकल्पतरु: २३



शासनसम्राजामिह समुदाये मेरुप्रर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं-नन्दतात् सुचिरम् ॥

सङ्कलनम्
कीर्तित्रयी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नन्दनवनकल्पतरुः-२३



शासनसम्राजामिह समुदाये मेरुप्रर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

दक्षिणायाणाम्
वि.सं. २०६५
ई.सं. २००९

सङ्कलनम्
कीर्तित्रयी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनवनकल्पतरुः-२३
(संस्कृतभाषामयं अयन-पत्रम् ॥)

सङ्कलनम् : **कीर्तित्रयी ॥**

प्रकाशनम् : **श्रीजैनग्रन्थप्रकाशनसमितिः**, खंभात ॥

वि.सं. २०६५, ई.सं. २००९

मूल्यम् : रू. १००/-

**जालपुटसङ्केतः www.jainlibrary.org**

प्राप्तिस्थानम् : **श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर**
१२, भगतबाग, शेठ आणंदजी कल्याणजीनी पेढी समीप,
पालडी, अमदावाद - 380007 दूरभाष : 079-26622465

सम्पर्कसूत्रम् : **"विजयशीलचन्द्रसूरिः"**
C/o. Atul H. Kapadia
A-9, Jagruti Flats,
Behind Mahavir Tower,
Paldi, Ahmedabad-380007
दूरभाष : 079-26574981
M. 9979852135

मुद्रणम् : **'क्रिष्ना ग्राफिक्स'**
नारणपुरा गाम, अमदावाद ॥
दूरभाष : 079 - 27494393



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रास्ताविकम्

संसारस्य सनातनो नियमोऽस्ति परावर्तनशीलता । जगतीह युगे युगे जीवनव्यवस्था समाजव्यवस्था च परावर्तमाना भवति । पुरा यदाचीर्णं भवेत् तदेव पश्चादनाचीर्णं भवति । एवमेव विपर्यस्तमपि भवति । यथाऽद्यत्वे यः कश्चन भूषाप्रकारः (fashion) प्रसिद्ध आदृतश्च स्यात् स एव कालान्तरेऽयुक्त अनादृतश्च भवति । एवं यः प्रकार इदानीं सर्वथाऽव्यवहृतो विरुद्धश्च स्यात् स एव भाविनि काले जनैः सम्मानितोऽपि भवति । ईदृशं चक्रं जगति सर्वत्र परिभ्राम्यत्येव ।

ज्ञानविषयेऽप्येवमेव जातम् । पूर्वं किल सर्वमपि ज्ञानं - शास्त्राणि आगमाश्च श्रुतपरम्परयैव रक्ष्यते स्म । पुस्तकपरिग्रहणं तु पापाय भवतीति मन्यते स्म, जीवहिंसाकारणत्वात् । तदनु कालप्रभावेण जनानां स्मृतौ क्षीयमाणायां सर्वथाऽनाचीर्णमपि पुस्तकलेखनं तत्परिग्रहश्चाऽऽदृतं जातम् । तदा किल तालपत्रेषु शास्त्राणि लिख्यन्ते स्म । ततः कागदपत्रलेखनयुगः समागतः । किन्तु लेखनेन किलाऽऽधिक्येनाऽपि द्वित्राः प्रतय एव प्राप्यन्ते स्म । ततश्च बहूनामुपकारार्थं तत् उपयोगि नैव भवेत् - इति विचारधारया समारब्धो मुद्रणयुगः । तेन च बहूनामुपकारो भवति स्म ।

अथ च तत्राऽपि मुद्राङ्कने काल-धनादीनामधिकं व्ययं भवन्तं विलोक्य प्रवृत्तः सङ्गणकसाहाय्येन मुद्रणस्य युगः । इदानीं चैतत् सर्वमप्यतिक्रम्य सर्वत्र जगति ज्ञानस्य प्रचार-प्रसारार्थं नूतनैवैका व्यवस्थाऽऽविष्कृताऽस्ति तन्त्रज्ञातृभिर्यस्या उपयोग जगतो यस्मिन् कस्मिंश्चिदपि कोणे स्थितो जनः कर्तुं शक्नोति । सा हि व्यवस्थाऽस्ति अन्तर्जालपुट(Internet)व्यवस्था । प्रायशो जनाः स्वबोधवृद्ध्यर्थं तस्योपयोगमभीक्ष्णं कुर्वन्तितराम् । ज्ञानक्षेत्रे कस्यचिदपि वर्चस्वं निरस्तमस्त्यनया । यद्यपि व्यवस्थाया अस्या दुष्फलानि सन्त्येव, तथाऽपि सु-फलानामाधिक्यादेषाऽऽदरणीयाऽऽकारणीया चाऽप्यस्ति ।

एतस्या व्यवस्थाया एवाऽऽदरणेनेदानीं **नन्दनवनकल्पतरु**रपि नूतने युगे प्रविष्टोऽस्तीत्येष नोऽतीवाऽऽनन्दस्य विषयः । अस्य प्रथमत आरभ्य सर्वा अपि शाखा अन्यान्यपि च पुस्तकानि जालपुटे संस्कृतप्रेमिणां कृते स्थापितानि सन्ति । इतः परमपि प्रकाश्यमानाः शाखास्तत्र स्थापयिष्यन्ते । अतः सर्वेऽपि संस्कृतज्ञाः संस्कृतप्रेमिणश्चाऽस्योपयोगं कुर्वन्तु - इति विज्ञप्तिः ।

जालपुटसङ्केतस्त्वेवमस्ति - 1. www.jainlibrary.org, 2. jainelibrary.org, 3. jainelibrary.com, 4. jainaelibrary.com, 5. jainaelibrary.org

भाद्रपदशुक्लपूर्णिमा
स्तम्भतीर्थम्

**कीर्तित्रयी**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

सम्पूज्याः सद्गुरुचरणाः, मान्या कीर्तित्रयी,
प्रशस्ताः मुनयश्च,
सादरं नमस्काराः ।

दिव्यानां देवानां नन्दनं वनम्
नन्दने वरे च कल्पतरुश्शोभनम् ।
नूनं यत्साध्यं, सारस्वतं मतम्
सद्गुरोः प्रसादतश्च सर्वं सिद्धम् ॥
ज्योतिर्गमय भद्रैषा प्रार्थना प्रभुपादयोः ।
तथा निवारिता स्याद्धि कृपयैवान्धकारिता ॥
किन्तु जानंश्च पश्यँश्च, दुर्गुणानां हि पोषणम् ।
क्रियते चेत्तदा विश्वं को नामोज्ज्वालयिष्यति ॥

'नन्दनवनकल्पतरुः' इत्यस्य २२तमशाखायाः प्रास्ताविके कृता चिन्ता, समेषां भारतीयानां स्यादिति प्रार्थ्यते । निजानुजानां, सन्तत्याश्च संस्काररक्षणं विना, समेषामुत्तरजीवने सन्त्रासः स्यादेवेति सत्यम् अवगन्तव्यं यथाशीघ्रम् । विविधेषु जनसम्पर्कमाध्यमेषु, नग्नतायाः, चारित्र्यभग्नतायाः, दुर्गुणोद्रेकतायाश्च नियन्त्रणं कार्यमेव नियन्त्रणसभया (सेन्सर बोर्डेन) । जागरूकत्वमेतदर्थम् अनिवार्यम् ।

तथाकथितैः शासकैः, साम्प्रतं स्वार्थं विहाय, राष्ट्रस्य विश्वस्य च चिरन्तनसौख्यार्थम्, एतदर्थं प्रयत्नाः विधेयाः ।

जाते सन्त्राससामर्थ्ये, अस्माकमसहायता ।
प्रार्थना हृदयस्याऽत्र प्रभो ! पारं नयाऽधुना ॥

श्रीदशवैकालिकसूत्रात् सर्वहितार्था 'महावीरवाणी' उद्धृता, संस्कृत-छायया सहिता, इत्येतदभिनन्द्यते सादरम् । एवं कृते भाषाद्वयस्य परिचयः, प्राप्तव्यस्य प्राप्तिश्च भवति । प्राकृतविभागस्याऽपि संस्कृता छाया प्रार्थ्यते एतदर्थम् । अन्यभाषातः संस्कृतानुवादाः अपि नूनम् आवकार्याः सत्त्वयुताः ।

कथाः स-रसाः बोधप्रदाश्च । 'मर्म-नर्म' विभागः अपि विशिष्टः सन् रोचकः ।

**डो. वासुदेव वि. पाठकः 'वागर्थ'**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

कीर्तित्रयीम् विजयशीलचन्द्रसूरिज्योत्स्नामयीं प्रकटनन्दनकल्पवृक्षम् ।
षाण्मासिकीमुदितवार्षिकपक्षपालीं साहित्यखेचरसभूचरहर्षहेतुम् ॥

सप्राकृतां सरल-संस्कृत-नूत्नरम्य-सद्वृत्तबोधनपरां रापत्रिकां स्वाम् ।
लोके विशुद्धनयभावमहो ! ददानां अर्हज्जनाचरितसंस्तुतिमावयामः ॥

प्राकृतस्य संस्कृतभाषानुवादं केऽपि इच्छन्ति यदि साध्यं योग्यं च नीतिपद्यानां तथा क्रियतां नाम अनभ्यस्तप्राकृतानामति अभ्यासपाठो भविष्यति ।

**अरैयर् श्रीरामशर्मा**

## वाचकानां प्रतिभावः

**माननीयेषु विजयशीलचन्द्रसूरिमहोदयेषु,**

सादरं विकसन्तुतमां मे प्रणतयः । कुशलो कुशलं कामये ''स्वस्ति'' नन्दनवनकल्पतरुं प्राप्य नितरां प्रसीदति मे चेतः । वस्तुतः नन्दनवनकल्पतरुकर्तारः संस्कृतकल्पोद्याने कल्पतरव एव । तत्रस्थाः कथा काव्यानि लेखाश्च मनो हरन्ति मे ।

**डॉ. नारायणदाशः**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

मान्याः, सादरं प्रणतयः ।

द्वाविंशे नन्दनवनकल्पतरौ प्रास्ताविकं नैतिकताक्षेत्रे य आतङ्को जातः, तस्य निवारणाय प्रेरयति । श्रीदेवर्षिकलानाथशास्त्रिणः चाटुचर्याचमत्काराः इति कथा न केवलं चित्ते हास्यं जनयति, अपि तु वर्तमानसमाजस्य यथार्थतामपि निगदति । पत्रकाराः, पत्रिकासम्पादकाश्च तान् ग्रन्थान् समीक्षन्ते, तेषामेव च विचारान् सततं प्राकाश्यं नयन्ति, ये सत्तायां विराजन्ते । मयाऽपि मन्ये जीवने तथ्यमिदमनुभूतम् । अनेके संस्कृतग्रन्था मया पत्रपत्रिकासु समीक्षिताः, किन्तु यदा मया स्वयमेको ग्रन्थः प्राकाश्यं नीतः, तर्हि तस्य समीक्षा सम्बद्धसम्पादकवर्यैः प्रायशो न विहिता । स्वकीयां प्रशस्तिं नाऽहं कामये, किन्तु प्रणीतग्रन्थस्य दोषाणां प्रकाशनं तु युज्यते एव । मान्यमुनिरत्नकीर्तिविजयस्य कथा 'कलिकालस्य भरतः' सद्व्यवहारस्योत्तमां शिक्षां प्रयच्छति । साम्प्रतं मोहनसदृशोऽनुजः, रमेशतुल्योऽग्रजश्च समाजे न विराजते । एवंविधाभिः कथाभिः पाठकानां हृदये सद्भावाः सञ्जायेरन्, किन्तु मनसि खेदोऽनुभूयते यज्जनाः एतादृशीः कथाः पठितुं नाऽभिलषन्ति । सन्दर्भेऽस्मिन् नन्दनवनकल्पतरोः प्रयत्नाः प्रशंसनीयतराः सन्ति । जयतु संस्कृतं संस्कृतिश्च ।

**डा. रूपनारायणपाण्डेयः**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| महावीरवाणी | | १ |
| श्रीभाभापार्श्वनाथस्तोत्रम् | स्व. प्रवर्तकमुनिश्रीयशोविजयः | ४ |
| श्रीजिनेश्वरप्रार्थनम् | मुनिकल्याणकीर्तिविजयः | ६ |
| शासनसम्राडभिनन्दनम् | पं. शोभाकान्त-झा-मैथिलः | ७ |
| विरहाष्टकम् | | ९ |
| श्रीविजयनेमिसूरीश्वरवन्दना | डॉ. वासुदेवः वि. पाठकः | ११ |
| गलज्जलिकाः | प्रा. अभिराजराजेन्द्र मिश्रः | १२ |
| राष्ट्रगायत्री | डॉ. वासुदेव वि. पाठकः | १६ |
| त्रिरङ्गः | प्रो. ताराशङ्कर शर्मा | १७ |
| कविकवयित्रीगीतम् | डॉ. आचार्यरामकिशोरमिश्रः | १९ |
| कूटानि (अन्तरालापाः) | डॉ. वासुदेव वि. पाठकः | २१ |
| **आस्वादः** | | |
| चिन्तनधारा | मुनिरत्नकीर्तिविजयः | २२ |
| संवेदनशीलता पशु-पक्षिणाम् | मुनिकल्याणकीर्तिविजयः | २४ |
| सरलाः स्याद्वादसिद्धान्ताः | मुनित्रैलोक्यमण्डनविजयः | ३१ |
| काव्यविषये जिनसेनाचार्यस्य गम्भीरा विचाराः | एच्. वि. नागराजराव् | ३७ |
| **पत्रम्** | मुनिधर्मकीर्तिविजयः | ४१ |
| **काव्यानुवादः** | | |
| प्रार्थनाद्वयम् | मुनिधर्मकीर्तिविजयः | ४७ |
| रवीन्द्रगीतिका | मुनित्रैलोक्यमण्डनविजयः | ४९ |
| गृह्णन्तु | सा. धृतियशाश्रीः | ५२ |
| उपमानप्रमाणम् | अनु. मुनिकल्याणकीर्तिविजयः | ५३ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| **कथाः** | | |
| अद्भुतो विजयः | मुनिरत्नकीर्तिविजयः | ६४ |
| स्पर्शमणिः | मुनिरत्नकीर्तिविजयः | ६९ |
| अन्तरम् | मुनिधर्मकीर्तिविजयः | ७१ |
| बुद्धिः सर्वार्थसाधिका | मुनित्रैलोक्यमण्डनविजयः | ७२ |
| शिष्यपरीक्षा | सा. धृतियशाश्रीः | ७७ |
| सत्यवती | डॉ. आचार्यरामकिशोरमिश्रः | ७८ |
| **रङ्गमञ्चः** | | |
| ससइ-पुन्वोः प्रणयकथा | डॉ. कान्तिभाई गोरः | ८० |
| **नर्म महाजनानाम्** | मुनिरत्नकीर्तिविजयः | ९३ |
| **मर्म-नर्म** | कीर्तित्रयी | ९६ |
| **प्राकृतविभागः** | | |
| सोलसमतित्थयरसिरिसंतिनाहथुई | मुनिकल्याणकीर्तिविजयः | ९८ |
| पाउड-मुत्तावचायो | अरैयर् श्रीरामशर्मा | ९९ |
| पाइय-विन्नाण-कहा | आ. विजयकस्तूरसूरिः | १०१ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# महावीरवाणी

(श्रीदशवैकालिकसूत्रात् सङ्कलिता)



असच्चमोसं च अणवज्जमकक्कसं ।
समुप्पेहमसंदिद्धं गिरं भासेज्ज पण्णवं ॥७-३॥
(सं.) असत्यामृषां सत्यां च अनवद्यामकर्कशाम् ।
समुत्प्रेक्ष्य असन्दिग्धां गिरं भाषेत प्रज्ञावान् ॥

तहेव फरुसा भासा गुरुभूओवघाइणी ।
सच्चा वि सा न वत्तव्वा जओ पावस्स आगमो ॥७-११॥
(सं.) तथैव परुषा भाषा बहुभूतोपघातिनी ।
सत्याऽपि सा न वक्तव्या यतः पापस्याऽऽगमः ॥

तहेव सावज्जणुमोयणी गिरा, ओहारिणी जा य परोवघाइणी ।
से कोह लोह भयसा व माणवो, न हासमाणो वि गिरं वएज्जा ॥७-५४॥
(सं.) तथैव सावद्यानुमोदिनी गीः अवधारिणी या च परोपघातिनी ।
सः क्रोधाद् लोभाद् भयाद् वा मानवो न हसन्नपि गिरं वदेत् ॥

सवक्कसुद्धिं समुपेहिया मुणी, गिरं च दुट्ठं परिवज्जए सया ।
मियं अदुट्ठं अणुवीइ भासए, सयाण मज्झे लहई पसंसणं ॥७-५५॥
(सं.) सद्वाक्यशुद्धिं समुत्प्रेक्ष्य मुनिः गिरं च दुष्टां परिवर्जयेत् सदा ।
मितामदुष्टाम् अनुविचिन्त्य भाषेत सतां मध्ये लभते प्रशंसनम् ॥

बहुं सुणेइ कण्णेहिं बहुं अच्छीहिं पेच्छइ ।
न य दिट्ठं सुयं सव्वं भिक्खू अक्खाउमरिहइ ॥८-२०॥
(सं.) बहु शृणोति कर्णाभ्यां बहु अक्षिभ्यां पश्यति ।
न च दृष्टं श्रुतं सर्वं भिक्षुः आख्यातुमर्हति ॥

देहे दुक्खं महाफलं ॥८-२७॥
(सं.) देहे दुःखं महाफलम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



सुयलाभे न मज्जेज्जा ॥८-३०॥

(सं.) श्रुतलाभेन न माद्येत् ॥

अधुवं जीवियं नच्चा सिद्धिमग्गं वियाणिया ।
विणियट्टेज्ज भोगेसु आउं परिमियमप्पणो ॥८-३४॥

(सं.) अधुवं जीवितं ज्ञात्वा सिद्धिमार्गं विज्ञाय ।
विनिवर्तेत भोगेभ्यः आयुः परिमितमात्मनः ॥

जरा जाव न पीलेइ वाही जाव न वड्ढई ।
जाविंदिया न हायंति, ताव धम्मं समायरे ॥८-३५॥

(सं.) जरा यावन्न पीडयेत्, व्याधिर्यावन्न वर्धेत ।
यावदीन्द्रियाणि न हीयन्ते, तावद् धर्मं समाचरेत् ॥

कोहं माणं च मायं च, लोभं च पापवड्ढणं ।
वमे चत्तारि दोसे उ, इच्छंतो हियमप्पणो ॥८-३६॥

(सं.) क्रोधं मानं च मायां च, लोभं च पापवर्धनम् ।
वमेत् चतुरोऽपि दोषान् इच्छन् हितमात्मनः ॥

कोहो पीइं पणासेइ, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥८-३७॥

(सं.) क्रोधः प्रीतिं प्रणाशयति, मानो विनयनाशनः ।
माया मित्राणि नाशयति, लोभः सर्वविनाशनः ॥

उवसमेण हणे कोहं, माणं मद्दवया जिणे ।
मायं चज्जवभावेण, लोभं संतोसओ जिणे ॥८-३८॥

(सं.) उपशमेन हन्यात् क्रोधं मानं मार्दवेन जयेत् ।
मायां चाऽऽर्जवभावेन लोभं संतोषतो जयेत् ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org



कोहो य माणो य अणिग्गहीया, माया अ लोभो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया, सिंचिंति मूलाइं पुणब्भवस्स ॥८-३९॥

(सं.) क्रोधश्च मानश्चाऽनिगृहीतौ, माया च लोभश्च प्रवर्धमानौ ।
चत्वारः एते कृत्स्नाः कषायाः सिञ्चन्ति मूलानि पुनर्भवस्य ॥

राइणिएसु विणयं पउंजे ॥८-४०॥

(सं.) रत्नाधिकेषु (गुणाधिकेषु) विनयं प्रयुञ्जीत ॥

संपहासं विवज्जए ॥८-४१॥

(सं.) संप्रहासं (अत्यन्तहास्यं) विवर्जयेत् ॥

अल्लीणगुत्तो निसिए सगासे गुरुणो मुणी ॥८-४४॥

(सं.) आलीनगुप्तः (ईषल्लीनः कूर्मवद् गुप्तदेहश्च) निषीदेत् सकाशे गुरोः मुनिः ॥

अप्पत्तिअं जेण सिया, आसु कुप्पेज्ज वा परो ।
सव्वसो तं न भासेज्जा, भासं अहियगामिणिं ॥८-४७॥

(सं.) अप्रीतिर्येन स्यात्, आशु कुप्येद् वा परः ।
सर्वशः (सर्वथा) तां न भाषेत भाषाम् अहितगामिनीम् ॥

विसएसु मणुन्नेसु पेमं नाऽभिनिवेसए ।
अणिच्चं तेसिं विण्णाय, परिणामं पोग्गलाण उ ॥८-५८॥

(सं.) विषयेषु मनोज्ञेषु प्रेम नाऽभिनिवेशयेत् ।
अनित्यं तेषां विज्ञाय परिणामं पुद्गलानां तु ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org



# श्रीभाभापार्श्वनाथस्तोत्रम्

(इकारादिरहिताकारान्तद्वितीयादि पदैर्विरचितम्)

**स्व. प्रवर्तकमुनिश्रीयशोविजयः**

अकारान्त-द्वितीयान्तपदैरर्थप्रगुम्फितैः ।
सुरासुरनरस्तुत्यं हतकर्मव्रजं विभुम् ॥१॥

न विद्यन्ते स्वरा यत्र इकाराद्या बुधेश्वर !
पदैरेवंविधैः स्तोष्ये **पार्श्वं भाभा**भिधानकम् ॥२॥ युग्मम्

सारं भयापारपयःप्रतारयानं जगज्जन्मजराप्रणाशम् ॥
आनन्दकन्दप्रभवप्रवार्दं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥३॥

माङ्गल्यकारं हतमानसारं पापापहारं गतकर्मभारम् ॥
सन्त्रासवारं मदपाशहारं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥४॥

ज्ञातार्थजालं जनवारपालं सर्वाक्षदानं सकलप्रकान्तम् ॥
मायानलव्रातजलप्रपातं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥५॥

आमप्रणाशं वरदानदक्षं दग्धामयव्रातबलापकक्षम् ॥
नष्टान्तरङ्गासहनप्रपक्षं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥६॥

शश्वत्प्रजप्यं सततं प्रकाम्यं ब्रह्मप्रदानं पुरुषप्रधानम् ॥
परान्नशक्रं गतपाशचक्रं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥७॥

माङ्गल्यमालं सकलप्रपालं प्रकान्तभालं गतगर्ह्यकालम् ॥
अस्तप्रपञ्चं प्रवराग्र्यवाचं भाभाख्यकं पार्श्वमहं प्रपन्नः ॥८॥

अज्ञानकाननधनञ्जयमाप्तमर्ह्यं मारान्धकारशमनप्रबलार्ककल्पम् ॥
संसारचण्डगदवस्रसमप्रभावं भाभाख्यपार्श्वमहमामहरं प्रपन्नः ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



सत्पादपङ्कजपरागकपावनक्ष्मं स्फारापपाशवचनव्रजराजवक्त्रम् ॥
कर्माशयक्षपणलब्धवरापवर्गं भाभाख्यपार्श्वमहमामहरं प्रपन्नः ॥१०॥

॥ अथ स्तुत्यनामगर्भो बीजपूरकप्रबन्धः ॥

जगद्भास ! तमोहार ! जनभानकरेश्वर ! ॥
जय मारमदोद्धार ! जय देव ! शमाकर ! ॥११॥

॥ अथ कविनामगर्भश्चक्रबन्धः ॥

**यः** स्वैरं रमते गुणैर्हतमदः पार्श्वः प्रभावोदयः ।
**शोष**ः कर्मचयस्य बोधितजनः कल्याणकेलीगृहम् ॥

**विश्व**श्रेष्ठगुणः प्रकाशितमहत्सिद्धान्तसारागमः ।
**ज**न्तूद्धारकरो वरः कृतपदो निर्वाणगेहेऽवतात् ॥१२॥

श्री**नेमिसूरि**साम्राज्ये **यशोविजय**साधुना ॥
रचिता स्तुतिराकल्पं पठ्यतां सर्वकामदा ॥१३॥

भणन्ति सुधियः स्तोत्रमेतत्पार्श्वस्य ये भुवि ॥
ते वैभवभरा यान्ति महोदयफलं परम् ॥१४॥

प्राज्ञानन्दपदं स्तोत्रमेतद्भव्यसुखावहम् ।
पठ्यमानं जनैः सर्वैर्वृद्धिं प्राप्नोतु सर्वदा ॥१५॥

इति श्रीकविपण्डितकुलहृदयसरसीरुहभृङ्गायमाणप्रबलकलिकलुषप्रकम्पननिरोधसुसाधुजन-
शिखरिशृङ्गायमाणश्रीमद्विजयनेमिसूरीश्वरचरणशरणयशोविजयविरचितायां
स्तुतिकल्पलतायां तृतीयस्तबके इकारादिस्वररहिताकारान्तपदकदम्बमयभाभापार्श्वाष्टकं
श्रीमद्विजयनेमिसूरीश्वरप्रसादात् समाप्तम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# श्रीजिनेश्वरप्रार्थनम्

मुनिकल्याणकीर्तिविजयः

(रागः यमनकल्याणः)

जय जय जगदानन्द ! जिनेश्वर !
जय जय भुवनविबोधदिनेश्वर !

मम शरणं तव चरणयुगं जिन !
मम ध्यानं तव वदनमवृजिन ! ।
मम ध्येयं तव रूपं सार्व !
मम धेयं तव वचनमगर्व ! ॥१॥

वर्षतु मयि तव करुणावृष्टिः
सततं भवतु समतापुष्टिः ।
प्रवहतु हृदि मे शुद्धा दृष्टिः
द्रुतं विनश्यतु ममताकृष्टिः ॥२॥

त्वदीयमार्गानुसरणकामो
वर्तेऽहं परमवगुणधाम ।
कदा भविष्याम्यात्मारामः
निजरूपैकपरिज्ञाकामः ॥३॥

वेदान्त्यभिमतमायां मोक्तुं
साङ्ख्यसम्मतां प्रकृतिं त्यक्तुम् ।
बौद्धवासनां संपरिहर्तुम्
उत्कोऽस्मि स्वगृहं प्रतिगन्तुम् ॥४॥

निजगृहमेव मे निलयो भवतु
विश्वे यद्यपि प्रलयो भवतु
त्वयि मम मनसो विलयो भवतु
सत्कल्याणं श्रेयो भवतु ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शासनसम्राडभिनन्दनम्

पं. शोभाकान्त-झा-मैथिलः

श्रीजिनः शरणम् ॥

तपोगच्छाधिपति-महामहोपदेशक-जैनशासनसम्राट्-पण्डितमण्डलीपुण्डरीकमार्तण्ड-श्री १०८ युतविजयालङ्कृतनेमिसूरिमहानुभावानां तथा तच्चरणारविन्दलब्धप्रथितयशसां श्री१०८ युतविजयोदयसूरिमहाशयानां तथा श्री१०८ युतविजयनन्दनसूरिमहोदयानामन्तिके—

**अभिनन्दनम् ॥**

प्रोद्यद्विद्यानवद्यद्युतिदलितमनोध्वान्तसन्तानराशिः
साशीर्वादोपदेशैः पिहितमतिजनानुन्नयन् भूतलेऽस्मिन् ।
गाम्भीर्यौदार्यपुञ्जानुपमविभवाम्भोजभाजो विवस्वान्
तर्कालङ्कारदीप्तो विजयपदसुयुक् राजतां **नेमिसूरिः** ॥१॥

विज्ञस्वान्तसरोजवर्तिविलसद्-रोचिष्णुजिष्णुप्रभा-
बिभ्रच्चारुसुधर्मलक्षवचनप्रक्षालिताज्ञानभूः ।
जीयाद् भारतवर्षभाग्यमिहिरो मोहान्ध्यविध्वंसकः
तीर्थोद्धारपरायणो विजययुक् सूरीश**नेमिप्रभुः** ॥२॥

श्रीमन् ! त्वादृशनैगमादिनिपुणो वाचा च वाचस्पतिः
तोषे शम्भुसमः कृतौ विधुसमः रक्षासु सूर्योपमः ।
कीर्त्या विश्वजयी जगद्गुरुवरस्तत्त्वार्थसन्दर्भकः
नैव क्वाऽपि समीक्षितः क्षितितले नो वा च सन्द्रक्ष्यते ॥३॥

ध्यानाराधनलब्धशारदकलाजेगीयमानस्तुतिं
कल्याणाङ्कुररक्षदक्षसुधियं श्रीमन्तमेकं कलौ ।
श्रायं श्रायमवैति विज्ञपटली तोषाम्बुजं रोचकं
एतल्लोकविलासलालसमना अन्यत्र निःश्रेयसम् ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहाज्ञानमदान्धवारणसुधीविध्वस्तधात्रीतलं
वीक्ष्य द्राक् प्रतिपालनाय हरितामाधाय वीरध्वनिः ।
स्याद्वादातुलतर्कदन्तकिरणैर्मोहादि संनाशयन्
वादीन्द्रो विजयातियुक् **हृदयसूरीश**श्चकास्तु क्षितौ ॥५॥

साहित्योदधितत्त्वमन्थनिहिताभीष्टार्थमाध्वीकभूः
उद्यत्तर्कवितर्कमर्ममहिमक्षुभ्यद्विवादिव्रजः ।
पूज्यः श्रीयुत**नन्दनो** विजयभाक् सूरीशमान्यो बुधः
विद्यावारिधिकोविदाग्र्यगणनः संराजतां भानुवत् ॥६॥

यदीयचरणाम्बुजच्युतसुधागलन्माधुरीः
तपः प्रसूतजित्वरस्फुरदरीणविद्युद्द्युतिः ।
तपस्विमुनिसन्ततिः प्रमुदमानसा जृम्भते
अहो शरणमस्तु सः रुचिरकीर्तिचान्द्रीं दधत् ॥७॥

इति समर्पयति व्याकरण-न्यायाचार्य-वेदान्त-तर्कतीर्थ-
लब्धस्वर्णपदकश्री**शोभाकान्तझा-मैथिलपण्डितः** ॥

द्राक्षा म्लानमुखी जाता शर्करा चाऽश्मतां गता ।
सुभाषितरसस्याऽग्रे सुधा भीता दिवं गता ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शासनसम्राड्-जगद्गुरु-आबालब्रह्मचारि-परमपूज्यभट्टारकाचार्यमहाराजश्रीमद् विजयनेमिसूरीश्वरभगवत्विरहाष्टकम् ।।

छत्रच्छायमुपास्य यस्य सपदि प्राप्तं शिरोरत्नतां
लोकेऽस्मिन् परिभूय धर्मनिवहान् हा हन्त तत् त्वां विना ।
नाथाऽनाथमिदं ससङ्घमधुनोत्साहेन हीनं जवा-
ज्जैनं शासनमाप्य कं मुनिवरं सम्राजमादीप्यताम् ? ।।१।।

दीप्यन्तामधुनाऽऽशु लोकगगने नानाऽन्यधर्मोडवः
शब्दायन्तु विसाध्वसागतमहाघूका विपक्षा भृशम् ।
अज्ञानान्धतमिस्रमेवमथवा लोकानतिक्राम्यतु
धर्मव्योममणिर्महामुनिरसौ नेमिर्बताऽस्तं गतः ।।२।।

हृष्टं लोकपयोजनुस्तमततिर्जाड्यस्य नष्टोदये
म्लानं संसृतिवासनालतिकया दीक्षाप्रचण्डातपे ।
शुष्कं स्वल्पसरोविपक्षनिवहैः पाके क्रमात् तेजसो
वृद्धं धर्मशुभैर्बताऽस्तमयितो नेमिः कथं धिग् विधे ! ।।३।।

क्वेवं यास्यथ ? किं करोषि ? कथमेतादृक् प्रमादात् कृतं ?
स्वाध्यायं कुरु, नाऽसदाचर, मुधा नेतस्ततो याहि भोः !।
इत्थं शिक्षणवृत्तिरद्य भवता केनाऽपराधेन मे
नो स्वामिन् ! कथमुच्यते प्रियतया हा हन्त ! भाग्यैर्हतः ।।४।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्वा शोकमलं विलप्य बहुशोऽश्रूणि प्रमृज्याऽन्ततो
याते स्वस्त्वयि हन्त लोकनिवहं कुर्युर्महोऽष्टाह्निकम् ।
शिष्यास्त्वद्वचनामृतं विरहजं सञ्चित्य चित्ते विषं
स्थास्यन्त्येव सहेव शासनधुरो वैधव्यदुःखं कथम् ? ॥५॥

को धर्माचरणं जनाननलसः शिक्षेत कारुण्यवान् ?
आबाल्याद् व्रतपालनस्य च महादर्शीभवेदद्य कः ? ।
को वा शासनसूत्रधारणपटुः स्यात् स्वः प्रयाते त्वयि
हा हा हन्त ! गुरो ! समस्तजगती जाता क्षणाद् दुःखिता ॥६॥

आक्रम्य प्रसभं दिगन्तममितैः शुभ्रैर्यशःसञ्चयैः
स्वर्गङ्गेन्दु-सुरेन्द्रवारणसमा नद्यश्च तारा गजाः ।
उद्योतैर्विहितास्तदेतदखिलां व्यस्तां व्यवस्थां जवाद्
हा हाऽमर्त्यगणैर्नियन्तुमदयैः स्वर्नायितो नस्त्यजन् ॥७॥

पत्संवाहनलालसौ मम भुजावुद्वेल्लतः प्रत्यहं
त्वत्सत्त्वभ्रमतोऽभिवन्दितुमहो नम्रं शिरो जायते ।
आदेशग्रहणाय हन्त सहसा पादौ पुरो गच्छत-
स्त्वत्त्यागान्महिमाप्रभं गुरुवर ! प्रेक्षस्व दीनं हतम् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# श्रीविजयनेमिसूरीश्वर-वंदना

**डो. वासुदेव वि. पाठकः 'वागर्थ'**

विद्यावारिधयस्सन्ति
जनादर्शनिदेशकाः ।
यशसा प्रोन्नतास्सन्ति
नेच्छन्ति सर्वथा यशम् ॥

मित्रवत्प्रोज्ज्वलास्सिद्धाः
सूचयन्ति पदं परम् ।
रीतिमुत्कर्षदां नित्याम्
श्वसन्ति श्वासयन्ति च ॥

रक्षां दिशन्ति सत्वेन
वन्दनैर्वन्दिता वराः ।
दर्शनैर्दृष्टिवन्तश्च
नानाशास्त्रविचक्षणाः ॥

गुरवः पूजिताः प्रीत्या श्रीनन्दनवने वरे ।
कल्पतरुप्रसूनैश्च पुष्पैस्सारस्वतैश्शुभैः ॥

इत्येवाऽस्मन्मतिर्बुद्धिः इत्येवाऽस्मद्गतिर्गुरो ।
वन्दनाऽऽनन्दना दिव्या, दिव्यं दिशन्तु देशिकाः ॥

मङ्गलो देशिकस्स्याच्च शिष्यश्च मङ्गलस्स्मृतः ।
मङ्गलं शिक्षणं सेव्यं त्रयी मङ्गलिकी वरा ॥

ज्ञानपञ्चमी, २०६५
सरस्वतीनगर, आंबावाडी, अमदावाद, ३८००१५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# गलज्जलिका:

प्रा. अभिराजराजेन्द्र-मिश्र

(१)

## नियमय स्वमनोहयम्

सत्वरं पथि विद्रवन्तं नियमय स्वमनोहयम्
पातयिष्यति पृष्ठतो, नंक्ष्यति सखे ! चरणद्वयम् ॥१॥

यावदशुभं नैव घटते, सुभगमश्वारोहणम्
किन्तु दुर्घटितेऽखिलं ननु जायते सङ्कटमयम् ॥२॥

क्व नु कशा, क्व नु कशाघात:, क्व नु गति:, क्व नु धावनम् ?
क्व नु चते ह्रेषारवा:, क्व नु हयसुखं मण्डलमयम् ?? ॥३॥

धरावक्षसि चङ्क्रमणजव्यतिकराणां का कथा ?
सागरोऽपि विभाति परिखा, प्रांशुगिरिरपि गोमयम् ॥४॥

द्रुतं धावति मनस्तुरगे स्वात्मवारणशङ्कया
परिहरन्ति नवग्रहा अपि गमनपथमुल्बणभयम् ॥५॥

रतिरथाश्वाश्चाऽपि निपतत्फेनसंहतिसङ्कुला:
चकितचकितैर्लोचनै: पश्यन्त्यहो मानसहयम् ॥६॥

मनोहयपृष्ठाधिरूढो मानवोऽपि महामद:
इन्द्रमप्यतियाति कृपणं गरुडमप्यचितरयम् ॥७॥

मनस्तुरगारोहिणामृषिभिर्न दृष्टं मङ्गलम्
जागरैर्नीता निशा दिनमपि न तेषां निर्भयम् ॥८॥

आरुरोह मनोहयं नहुषोऽपि पुण्यचयैस्सकृत्
शचीशुचिपातिव्रताऽब्धौ मज्जितं तच्चिन्मयम् ॥९॥

जनकजां कृष्णामवाप्तुं मनस्तुरगारोहिणौ
को न रावणकीचकौ पृच्छति समृद्धिमनामयम् ॥१०॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



मनस्तुरगारोहरसिकाः के न हन्त निपातिताः ?
क्वचिदहो पश्चात्तपन्त्यैतिह्यगर्ते सान्वयम् ॥११॥

हन्त, तत एवाऽभिराजस्साग्रहं कुरुतेऽर्थनाम्
विहर मातृभुवोऽञ्चले ननु वत्सलेऽप्यकुतोभयम् ॥१२॥

इह न यात्रा परवशा, शिवमशिवमपि नो परवशम्
जीवनं स्ववशेऽखिलं विलसति धरण्यां श्रीमयम् ॥१३॥

(२)

## नेदशी दुर्दृशा

हन्त दृष्टा पुरा नेदशी दुर्दृशा
राजनीतिर्यथा शास्ति सर्वङ्कषा ॥१॥

राजते सौधसानौ स काकोऽधमः
तन्वतेऽज्ञातवासं पिकाः सारसाः ॥२॥

निर्विषाणा लुलाया द्रवन्त्याहताः
शृङ्गवन्तो भ्रमन्तीव वन्याः शशाः ॥३॥

शूलमारोप्यते सत्यवादी पुनः
यो द्विजिह्वस्स एवाऽद्य चञ्चद्यशाः ॥४॥

सर्वसौख्योपपन्नाः समाजन्तुदाः
भिक्षते देवनिष्ठा दधत्क्षुत्तृषा ॥५॥

हन्त, माहात्म्यमेतत्कलेर्दृश्यताम्
मूषिकाः सन्ति पुष्टा गजेन्द्राः कृशाः ॥६॥



भाषते मुक्तसिंहोऽपि वाचा शुनः
शास्त्यरण्यं शृगाली भृशं कर्कशा ॥७॥

किन्नु कुर्वन्त्वमी राजहंसाः सखे !
शास्ति वापीं बकस्तत्प्रजास्ते झषाः ॥८॥

दीपकैर्नोऽपनेतुं क्षमेयं निशा
सूर्यमेवेक्षते तद्विपन्ना रसा ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



(3)

**ज्ञायते नो, किमर्थं प्रदर्श्यामहे[१] !!**

निर्विवेकैर्नृशंसैर्भृशं खण्डिता
मूर्तयो हन्त यत्नेन रक्ष्यामहे ।
नाऽक्षता नासिका नोऽक्षतं लोचनं
ज्ञायते नो किमर्थं प्रदर्श्यामहे ॥१॥

कृत्तनासां स्वसारं दशास्योऽपि नो-
ऽमर्षयद् वैरिजायां जहार क्षणम् ।
भ्रातरो भारतीया न मे तादृशा-
स्तावता दुर्विपाकं समीक्षामहे ॥२॥

पर्वताज्जन्ममूलात्प्रसह्योद्धृता-
ष्टङ्किकासम्प्रहारैर्मुहुः संस्कृताः ।
प्रस्तराद्देवभावं गताश्चाऽपि नो
हा विधे ! सत्फलं तस्य विन्दामहे ॥३॥

निर्मिता भोः किमर्थं, न चेद्रक्षिता-
ष्टाङ्किकानां वृथाऽभूत्प्रभूतश्रमः ।
नामशेषत्वमासीद् वरं मादृशां
नाऽङ्गभङ्गस्थितौ स्थापनं संग्रहे ॥४॥

मन्दिरे नो प्रतिष्ठाऽभवज्जातुचित्
जन्मजातं निरर्थं त्रिदेवात्मकम् ।
कीदृशीयं परा दुःस्थितिर्दुस्सहा
यत्समाजेऽद्य नग्ना विधीयामहे ॥५॥



नैव पाद्यं न चाऽर्घ्यं न पुष्पाञ्जलि-
र्धूपदीपादिकं नो, न वा दक्षिणा ।
नो प्रणामस्तुतिर्नो क्षमाप्रार्थना
पञ्चभिर्नोपचारैः समर्च्यामहे ॥६॥

---

१. सागरविश्वविद्यालयीये संग्रहालये स्थापिताः आक्रमणकारिभिः खण्डिता दीनदीनाः समुत्खननात्प्राप्ताः मूर्तीः दृष्ट्वा प्रणीतं काव्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org



हन्त नाऽकर्णितो जातु शङ्खध्वनिः
श्रोत्ररन्ध्रं न गानामृतैस्तर्पितम् ।
रञ्जितं नो हृदुद्गीथजातैश्चिरं
संसृतौ नाम रूपं वृथा दध्महे ॥७॥

देवदास्यङ्गहारा न सम्प्रेक्षिता
नाऽपि मुद्रा, न चारी, न पूजाविधिः ।
वञ्चिताः प्रच्युता हन्त लोकादरा-
ज्जीर्णभित्तौ गृहे किं वयं कुर्महे ॥८॥

मन्दिरेषु त्रिसन्ध्यं समाराधिता
मूर्तयस्सन्त्यनेकाः, परं ता वयम् ।
दैवयोगादनावृत्तवातायना-
न्मल्लिकावातगन्धं प्रतीक्षामहे ॥९॥

नित्यरुद्धप्रवेशे गृहेऽस्मिन् कथं
हन्त जायेत चन्द्रार्कयोर्दर्शनम् ?
दुष्करं तत्कृतं यैरहो सम्भवं
नित्यबन्धून् गवाक्षान्निजीकुर्महे ॥१०॥

म्लेच्छसंस्पर्शदोषैर्वयं दूषिताः
गौतमार्धाङ्गिनीवाऽश्मतां प्रापिताः ।
कश्चिदुद्धारकं कीर्तिविस्तारकं
राघवं रामभद्रं प्रतीक्षामहे ॥११॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

# राष्ट्र-गायत्री*

डॉ. वासुदेव वि. पाठकः 'वागर्थ'

ॐ अस्मद्राष्ट्राय विद्महे
राष्ट्रीयत्वाय धीमहि ।
तन्नो राष्ट्रं प्रणोदयात् ॥

समेषां हितार्था समेषां शुभार्था
सदा संस्कृतैस्संस्कृता सत्त्वशीला ।
वरैर्वन्द्यते वन्दनीया विशिष्टा
वरा वत्सला मातृभूमिर्मदीया ॥

वयं गूर्जरीयास्तथा कोङ्कणीयाः
वयं काश्मिरीयास्तथाऽऽन्ध्रस्थिता वा ।
महाराष्ट्रीयाः केरलीयास्तथाऽपि,
वयं गौरवाढ्यास्सदा भारतीयाः ॥

सदा सत्कार्ये मे प्रबलतरवाञ्छा विकसतु
सुरम्ये सत्कार्ये सकलजनसौख्यं विलसतु ।
समेषां सौख्ये मे गुरुतरतया तोषमयता
प्रणामैर्विश्वार्थं गुरुवर ! तथा मोदलयता ॥



* यस्य कस्यापि राष्ट्रस्य सन्दर्भे ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# त्रिरङ्गः

प्रो. ताराशंकर शर्मा 'पाण्डेय'

राष्ट्रस्वातन्त्र्यलब्धौ सकलजनमनोमोदकस्तोलनेन
दिल्लीस्थे रक्तदुर्गे गगनतलगतो नो ध्वजोऽयं त्रिरङ्गः ।
प्राच्यां दोधूयमानो दिनकरकिरणैः काशते भारतात्मा
विश्वस्मिन् तेन कार्यं जगति निजशिरः प्रोन्नतं भारतीयैः ॥१॥

पृथ्वीतत्त्वं कदाचिद्धरिति च सलिलं श्वेतवर्णेऽपि तत्त्वं
तेजः काषायरङ्गेऽथ चपलपवनं क्वाऽपि दोधूयमाने ।
विश्वोत्तुङ्गोत्तमाङ्गे हिमगिरिसदृशे व्योमतत्त्वं दधानः
कः प्राणीव त्रिरङ्गे जगति विजयते पञ्चभूतान्वितोऽसौ ॥२॥

देशप्रेमप्रतीकः कृषिशमबलदो भारतप्राणभूतः
संसिक्तस्वाभिमानो जनमनसि हरिच्छ्वेतकाषायवर्णी ।
नो राष्ट्राखर्वगर्वं कमपि च तनुतेऽशेषविश्वे ध्वजोऽयं
नामं नामं वयं तं सकलसुकृतिनः स्याम नित्यं प्रमोदाः ॥३॥

कामो विष्णुः शिवो वा झषगरुडवृषानात्मवाहान् ध्वजेषु
प्रादात् संयोज्य शिक्षां विकसितिसहितां लोकलोकाय दिव्याम् ।
तस्माद्घोरारचक्रं युगयुगलगणं धारयित्वा त्रिरङ्गे
संदेशं नित्यगत्या वितरति सततं भारतं नाम देशः ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोऽसावुत्तुङ्गमूर्धा रणभुवि परितः सैन्यसंरक्षितो राट्
सामर्थ्यं कस्य योद्धुः कचमपि कुटिलं योऽस्य कर्तुं प्रभूयात् ।
बिभ्राणो राष्ट्ररागं तुमुलरणजयी नो हि नोत्ता त्रिरङ्गः
शत्रूणां यः पुरस्तादवनतिपरकः क्वाऽपि दृष्टः कदाचित् ।।५।।

वारम्वारं प्रयासैर्हिमगिरिशिखरे छद्मयुद्धं प्रकल्प्य
जातायां वैरशुद्धौ पुनरपि रिपुभिः क्रम्यते सीमरेखा ।
तज्जाल्मानाञ्च वृत्तं कुटिलमतिमतां कूटनीत्या निरस्य
दन्तानाम्लान् रिपूणामतिबलसुभटैर्यो विधत्ते त्रिरङ्गः ।।६।।

ओजःपूर्णा युवानोऽतुलबलभरिताः सैनिका भारतीयाः
कुर्वन्तः सीमरक्षां स्थलजलगगने स्वर्गता देशभक्ताः ।
शोभन्ते वेष्टितास्तेऽतिधवलयशसस्तत् त्रिरङ्गध्वजेन
नम्यन्ते पुण्यवन्तः सदसि मघवतो देववृन्दैः सदैव ।।७।।

भूः सस्यश्यामलाधो विकिरति हरितं यत्र वर्णं विशेषं
मध्ये पूर्णं हिमाद्रिस्तदुपरि धवलं रुद्रहासोपमानम् ।
दीप्तं काषायमुच्चैरुषसि रविरसौ तद् विहङ्गावलोके
माङ्गल्यो भारतीयः क्षितिजसुफलके शोभतेऽसौ त्रिरङ्गः ।।८।।

(इति जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये साहित्यविभागस्य अध्यक्षेण,
आचार्येण डॉ. ताराशंकरशर्मपाण्डेयेन विरचितं त्रिरङ्गाष्टकं काव्यं समाप्तम्)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कविकवयित्रीगीतम्

डॉ. आचार्यरामकिशोरमिश्रः

**कविरहं भवेस्त्वं कवयित्री ।**

(१)

शृणु सुभगे कान्ते ! मे वचनम्,
त्वं भव पुत्राणां प्रसवित्री ।
कवयिता यथाऽहं तथा भवे-
स्त्वं पत्युः कवित्वजनयित्री ॥
कविरहं भवेस्त्वं कवयित्री ॥१॥

(२)

अहमस्मि लिखन् कवितापङ्क्ती-
स्त्वं भव मात्राणां गणयित्री ।
न स्खलितं स्यादित्याशासे,
छन्दोध्वनिलयस्य कथयित्री ॥
कविरहं भवेस्त्वं कवयित्री ॥२॥

(३)

सहचरी त्वमसि यदहं कुर्वे,
त्वं भव सर्वेषां स्पृहयित्री ।
समये समये सहचरकार्ये,
त्वं भव सर्वथा मन्त्रयित्री ॥
कविरहं भवेस्त्वं कवयित्री ॥३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४)

रचयिता यथाऽहं काव्यानाम्,
त्वं भवेः शिशूनां रचयित्री ।
शैशवकलरवकेलिभिरनिशम्,
भव भवने प्रहर्षजनयित्री ।।
कविरहं भवेस्त्वं कवयित्री ।।४।।

(५)

यदहं वदामि निजमनसि तथा,
त्वं भव मम भावचित्रयित्री ।
अनुकूलाऽऽचरणं कुर्वाणा,
सुभगे ! भव मनोभावयित्री ।।
कविरहं भवेस्त्वं कवयित्री ।।५।।

-२९५/१४, पट्टीरामपुरम्,
खेकड़ा (बागपत) उ.प्र. २५०१०१
दूरभाषाङ्कः ०१२१२२३३५२७



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# कूटानि (अन्तरालापा:)

(अत्र त्रिषु चरणेषु प्रश्ना:, चतुर्थे च उत्तराणि)

**डो. वासुदेव वि. पाठक: 'वागर्थ'**

महावीरस्य को मार्ग: ?
माता च कीदृशी मता ?
कीदृशी सत्यनिष्ठाऽस्ति ?
अहिंसा. परमा. शुभा ॥

सदा किं करणीयं रे ?
कीदृशं जिनशासनम् ?
कथं मोक्षपदं वाच्यम् ?
सत्कार्यं. सुखदं. परम् ॥

कस्सदा पूजनीयोऽस्ति ?
जीवनं केन प्रोज्ज्वलम् ?
सुवर्णं कीदृशं भाति ?
गुरु:. त्यागेन. शोभते ॥

कस्सदैवाऽनुसर्तव्य: ?
सेवा कार्या कथं सदा ?
कीदृशश्च सतां मार्ग: ?
सज्जन: सर्वथा. शुभ: ॥

याति को न शुभे मार्गे ?
कस्य मार्ग: शुभङ्कर: ?
अनैतिक: कथं प्रोक्त: ?
दुष्ट: धर्मस्य बाधक: ॥



का जिनत्वस्य केन्द्रत्वे ?
शान्ति: कार्या कथं सदा ?
का नीतिर्वरणीयाऽस्ति ?
अहिंसा. सर्वथा. वरा ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चिन्तनधारा

मुनिरत्नकीर्तिविजयः

***कामं वनेषु हरिणास्तृणेन जीवन्त्ययत्नसुलभेन ।***
***धनिषु न दैन्यं विदधति ते खलु पशवो वयं सुधियः ॥***

मनुष्यो बुद्धिमान् गण्यते । तच्च सत्यमपि । न केवलमनेकशतवर्षेभ्यः किन्त्वनादितो मनुष्यस्यैव सर्वोपरित्वं प्रवर्तते । देवानपि स्वाधीनीकर्तुं सामर्थ्यं तस्य विद्यते । नैतावदेव किन्तु निसर्गमप्यतिक्रम्य तं वशीकर्तुं सत्त्वमपि तस्याऽस्ति । किन्त्वेतत् सम्भावनामात्रम् । न सर्वदा सर्वत्र वैतदेतादृशं वा परिदृश्यते । यतः "प्रायो नराः स्युः प्रचुरप्रमादाः" ।

पशून् विषयीकृत्य मनुष्यजातिमुद्दिश्य कथनरीतिरादीर्घकालात् प्रचलति । प्रकारेणाऽनेन मनुष्यस्य सत्त्वमुत्तेजितं भवति । अतो बोधं गृहीत्वा स्वदिशं स्वदशां वा यः परिवर्तयति स बुधः ।

अत्र हरिणानां स्वाभाविकं जीवनं प्रस्तौति कविः । स्वाभाविकतायामेव स्वत्वस्य गौरवं विद्यते । स्वाभाविकत्वस्याऽभावः स्वत्वं नाशयति । अत्र श्लोके नाऽस्ति पशोः पशुत्वस्य वा महिमा नाऽपि च मनुष्यस्य मनुष्यत्वस्य वोपहासः । किन्तु मनुष्यस्य गौरवहीनं जीवनं व्यथयति कविम् ।

यथाभाग्यं सुलब्धमेव सर्वं मनुष्याणाम् । किन्तु स न प्राप्यमाणेन प्राप्तेन वा सन्तुष्टः । बाह्यपरिवेशमलङ्कर्तुं सततं यतमानो मनुष्यो व्यस्तोऽपि जातो-ऽव्यवस्थितोऽपि जातः । तृष्णादग्धः सततं धावति मनुष्यः किञ्चित् प्राप्तुं किञ्चिद् भवितुं वा । सङ्केतं विनैवेप्सितस्य गृहं मृगयतो जनस्येव तस्याऽपि स्थितिरस्ति । कं स मृगयतीति तु जानाति किन्तु स कुत्र वसति कुतो वा प्राप्यते इति न जानाति । एवमेव मनुष्योऽपि सुखं मृगयति किन्तु तत् कुतः कथं वोपलभ्यते इति न जानाति । एतदज्ञानमेव मनुष्यस्य दौर्बल्यम् । एतदेव च जीवनस्य वास्तवस्या-ऽऽनन्दस्य सुखस्य चाऽऽवरणमस्ति । एतेन ह्यावरणेन मनुष्यो विह्वल इवेतस्ततो निष्फलमेव धावति । अन्ततश्चोद्वेगमेव प्राप्नोति ।

सुखस्य मार्गणं ह्यनादिकालीनसंस्काराणां विषयोऽस्ति । तत्तु सततं प्रवर्तत एव । आजन्मान्तरेभ्यस्तदविरतं प्रवर्तते । किन्तु सुखं कुतः कथं वोपलभ्यते इति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्केतमार्गणं हि साधनाया विषयः । तस्य प्रवर्तनमद्यावधि अवशिष्टमेव ।

प्रथम तावद् ज्ञातव्यं यत् किमेतत् सुखं नाम । तदन्वेव तत् कुतः कथं वा प्राप्यते इति ज्ञानं जायते । परं तृष्णा हि मनुष्यस्य बुद्धिशक्तिं विवेकशक्तिं विचारशक्तिं चाऽऽवृणोति । अपरं चैतदावरणमपि महच्चित्रं यद् लक्ष्यमत्र न विस्मर्यते किन्तु दिग्भ्रान्तो जायते जनः ।

एवं च तृष्णाप्रेरितो दिक्शून्यमेव सततं धावन्तं मनुष्यं दृष्ट्वा कविहृदयं व्यथामनुभवति यद्-अनुपमशक्तिधारकोऽपि मनुष्यः किमीदृशोऽशक्त आसक्तो वा ? यो हि वक्तुमभिव्यक्तुं ज्ञातुं वाऽपि न क्षमस्तस्य पशोः कृतेऽपि निसर्गः सर्वं तृणादिकं सम्पादयति तर्हि यस्याऽस्ति बुद्धिर्विवेको विचारो वा स मनुष्यस्तु कामं जीवनावश्यकमन्नादिकं समुपलब्धुं शक्त एव । एवं सत्यपि कस्तं दीनं विदधाति ?

हं... तृष्णैव तं दीनं करोति 'स हि भवति दरिद्रो यस्य तृष्णा विशाला' । धनादीनामभावरूपं दारिद्र्यं हि कदाचिदपनेतुं शक्यम्, अपगच्छति चाऽपि तत् । किन्तु तृष्णाजनितं दारिद्र्यं तु कथमपि नाऽपगच्छति । दैन्येन मनुष्यत्वस्य गौरवं हन्यते । मनुष्यत्वस्य चोपहासो जायते ।

कविर्हरिणानुद्दिश्य कथयति- 'धनिषु न दैन्यं विदधति' । मार्मिकीयमुक्तिः । हरिणास्तृणार्थमेव परिभ्रमन्ति नाऽऽम्रफलार्थम् । यद्यपि प्राप्ते सति खादयेयुरपि किन्तु मार्गणं तृणानामेव । सहकारवृक्षस्य पुरतो मुखं व्यादायाऽऽम्रफलमपेक्ष-माणास्तिष्ठन्तो हरिणाः केनाऽपि दृष्टाः खलु ? अपरं च निर्झरणनीरमेव ते पिबन्ति, न हि तृषिताश्च ते नालिकेरवृक्षाणां पुरतो नालिकेरजलमपेक्षन्ते ।

वने पर्यटितुं गतः कविरेतद् दृष्ट्वैव विचारितवान् स्याद् यद् - 'हन्त ! एष क्षुद्रोऽपि प्राणी स्वाभिमानेनाऽदीनमेव जीवनं यापयति । किन्तु मनुष्यः ? प्राप्तेषु प्राप्यमाणेषु चाऽसन्तोषवन्तोऽप्राप्तेषु अप्राप्यमाणेषु च स्पृहावन्तो मनुष्या यत्र तत्र भ्रमन्ति यस्य कस्याऽपि च पुरतो याचन्ते तृष्णातृप्त्यर्थं च स्वाभिमानं गौरवं वाऽपि विक्रीणन्ति । एवं सत्यपि 'ते खलु पशवो वयं सुधियः !' इति किं वयं विचारयिष्यामः ?

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# संवेदनशीलता पशु-पक्षिणाम्

मुनिकल्याणकीर्तिविजयः

द्वाविंश्यां शाखायां पशु-पक्षिणां संवेदनशालिताविषयकाः केचित् प्रसङ्गाः उल्लिखिता आसन् । अत्र चाऽन्येऽपि केचित् प्रसङ्गाः समुल्लिख्यन्ते येषु पशु-पक्षिभिः स्वसंवेदनानि प्रकटं दर्शितानि ।

**१. शोकस्य दुःखस्य वा संवेदनम्-**

यद्यप्येते जीवा स्वीयदुःखं रोदनेन विलापादिभिर्वा प्रकटीकर्तुं न समर्थाः, तथाऽपि वर्तनेनैव तेषां मनोव्यथाविषयकाः सङ्केताः प्राप्यन्ते । अमेरिकादेशे कोलोराडोराज्ये कश्चन मार्क-बेकोफ्-नामकः प्रकृतिशास्त्री स्वमित्रेण सह पर्यटितुं निर्गत एकदा । अग्रे गच्छता तेन मार्गप्रान्ते पञ्च पक्षिणो दृष्टाः । तेष्वन्यतमः कार्‌यानसङ्घट्टनेन मृत आसीत् । अन्ये च चत्वारो यथाक्रमं तं सभानं कर्तुं प्रयतमाना आसन् । प्रत्येकं पक्षी तं पक्षिणं चञ्च्वा स्पृष्ट्वा तस्य सञ्चारं द्रष्टुं किञ्चिदपसरति स्म । बहुवारमेवं कृत्वाऽपि यदा स नोत्थितस्तदा चतुर्भिरप्येतैः 'स मृत' इति स्वीकृतम् । ततः श्रद्धाञ्जलिं दातुमिवैकः पक्षी उड्डीय कानिचित् तृणान्यानीतवान् मृतपक्षिणश्च पार्श्वे मुक्तवान् । एवमन्यैरपि क्रमश एतत् कृतम् । ततः सर्वेऽपि कञ्चित् कालं मौनं स्थितवन्तः । पश्चाच्चोड्डीनाः ।

हस्तिनां यूथे तु कस्यचिद् हस्तिनो मरणे जाते ईदृशमाचरणं प्रायः सर्वदा दृश्यते । आफ्रिकीयहस्तिनामभ्यासं कुर्वाणा सिन्थिआ-मोस् इत्यभिधा प्रकृतिविन्महिला स्वीयानुभवमुल्लिखति - ऋतुप्रवासार्थं विनिर्गते एकस्मिन् हस्तियूथे एका हस्तिनी मृतैकदा । तद् दृष्ट्वा सर्वेऽपि हस्तिनस्तत्रैव स्थगिता जाताः । प्रथमं तु तस्याः शवस्य परितः स्थित्वा तैः स्वशुण्डया तां जागरयितुं प्रयतितं, किन्तु यदा सा नोत्थिता तदा तां मृतां मत्वा सर्वैरपि क्रमशः शुण्डया मृत्तिकां खनित्वा तस्या उपरि पातिता तच्छवं चाऽऽच्छादितम् । ततस्त्रिचतुरा हस्तिनः निकटस्थानां वृक्षाणां काश्चिच्छाखास्त्रोटयित्वाऽऽनीतवन्तस्ताश्च तदुपरि परितश्च विकीर्णवन्तः । सूर्यास्तं यावदेतत् प्रवृत्तम् । ततो यद्यप्यग्रे गन्तव्यमावश्यकमासीत् तथाऽपि ते ततो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैवाऽपसृताः पदमात्रमपि । सर्वेऽपि ते वर्तुलाकारेणाऽऽरात्रि तत्रैव स्थिताः । प्रत्यूषे चैव प्रस्थिताः ।

स्वविषादप्रदर्शने हस्तिनां स्वभावस्याऽन्यदपि वैशिष्ट्यं ज्ञातव्यमस्ति । कस्यचिन्मृतस्य हस्तिनोऽस्थिपञ्जरमपि तेषां दृष्टिपथमागच्छेत् तदा तेऽत्यन्तं दुःखिता इवाऽऽहारगवेषणं प्रवासमन्यद् वा कार्यजातं स्थगयित्वा तस्य परित एव स्थित्वा बहुकालं यापयन्ति तत्र । यदि ते हस्तिनस्तत्राऽरण्ये एव वसन्तः स्युस्तदा तु ते वारं वारं तदस्थिपञ्जरस्थले आगच्छन्ति ।

चिम्पान्झी-वानरा अपि शोकस्य संवेदनं दर्शयन्ति । तथाहि – यदा कश्चिद् वानरपोतोऽकस्मान्म्रियेत तदा यूथस्था अन्ये वानरा दुःखिनीं तन्मातरं समालिङ्ग्य सान्त्वयन्ति ।

एतत्प्रसङ्गत्रयमपि ज्ञापयति यत् केषुचित् पशु-पक्षिषु शोकस्य संवेदनमस्ति ।

## २. सहानुभूतेः संवेदनम्

पशवः पक्षिणो वा यथाऽन्यस्य मरणेन व्यथिताः सन्तः स्वीयशोकं प्रदर्शयन्ति तथा यदाऽन्ये पशु-पक्षिणो दुःखिताः पीडिता वा भवन्ति तदा सहानुभूतेः संवेदनमपि तथाविधाचरणेन प्रदर्शयन्ति ।

अमेरिकीये एकस्मिन् प्राणिसङ्ग्रहालये बोनोबो-जातीयश्चिम्पान्झीवानर एक आसीत् । तस्य कृते एकं काचगृहं निर्मितमासीत् यथेच्छं सञ्चरणाय च लघूपवनमप्यासीत् । एकदैकः स्टार्लिग्-जातीयो लघुः पक्षी काचावरणमपश्यन् काचगृहेन सङ्घट्टितोऽभवत् । सङ्घट्टनवेदनया मानसाघातेन च स पुनरपि डयितुमशक्तः सन् भूमावेव स्थितः । एतद् दृष्ट्वा काचगृहे स्थितो वानरः शीघ्रं बहिरागतः । स तं पक्षिणं मृदुतयोत्पाट्य समीपस्थमुच्चवृक्षमारूढवान् । वृक्षोपरि गत्वा तेन शनैः शनैः तस्य पक्षिणः पक्षावुद्घाट्य स पक्षी वायौ उड्डाययितुं मुक्तः । स पक्षी हीतोऽपि स्वस्थो नाऽऽसीत्, अतः स डयितुमशक्तः सन् भूमावेव पतितः ।

एतद् विलोक्य दयाप्लावितः सन् स तत्समीपं गत्वा तत्रैवोपविष्टः । सूर्यास्तात् किञ्चित् पूर्वं स पक्षी स्वस्थो जातः पक्षौ प्रसार्य चोड्डीनः । एतेन हृष्टः स वानरस्तदनन्तरं स्वीयकाचगृहं प्राप्तः ।

एष प्रसङ्गो दर्शयति यत् जीवदयायाः सहानुभूतेश्च भावनयैव वानरः पक्षिणः सहायं कृतवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमेवौषधसंशोधनार्थं प्रयोगशालायां यदा कश्चन वानरः सन्ताप्यते तदा ये तज्जातीया अन्ये वानरास्तत्रैव स्थिताः स्युस्ते आहारं न भक्षयन्ति बुभुक्षिताश्चैव तिष्ठन्ति । एतदपि सहानुभूतिं दर्शयति ।

### ३. प्रेम-संवेदनम्

एतेषु पशु-पक्षिषु परस्परं प्रेमभावोऽपि भवति । अमेरिकायामेव द्वौ टेरियर्-जातीयौ शुनकौ परस्परं प्रेमभावयुतावास्ताम् । तयोरेकोऽन्ध आसीत् । अतोऽन्यः सदाऽपि तेन सहैव मार्गदर्शकतया भवति स्म । स सदाऽग्रेसरो भवति स्म । यदा चाऽन्धः श्वा कुत्रचित् सङ्घट्टनं कुर्वन् सम्भाव्येत तदा सोऽन्यस्तं प्रेम्णाऽन्यत्र कृष्ट्वा नयति स्म । एतयोः सायुज्यं बहूनि वर्षाणि पर्यवसितम् ।

एवमेवोत्तरकेन्या(आफ्रिकीय)देशे एकस्मिन् हस्तियूथे एका करेणु-र्व्रणवशात् खञ्जाऽऽसीत् । तद्धि यूथं शीघ्रप्रवासार्थं सन्नद्धमासीत् । किन्तु करेणो-रस्याः कारणादन्यैर्हस्तिभिः स्वीयवेगोऽल्पीकृतः । ततोऽपि सा तत्सायुज्यं संधारयितुमशक्तैवेति दृष्ट्वा ते हस्तिनः स्तोकमग्रे गत्वा तां प्रतीक्षन्ते स्म तस्याश्च कृते शाखा-पर्णादिकं भोजनमपि रक्षन्ति स्म ।

एतत्प्रसङ्गद्वयमपि पश्वादीनामपि परस्परं प्रेमादिसंवेदनं दर्शयति ।

### ४. आनन्दस्य हर्षस्य वा संवेदनम्

प्रायशः बहवः पशु-पक्षिणः स्वीयमानन्दं हर्षं वा मुखभावद्वारा दर्शयितुमशक्ताः । श्वानो हि पुच्छचालनेन हर्षं प्रदर्शयन्तो दृश्यन्ते । किन्तु चिम्पान्झीवानरो हि मुखस्य हावभावैर्नृत्येन चाऽपि स्वमानन्दं समुल्लासं च दर्शयति । तद्धि, यदा स कस्याश्चिन्नद्या निर्झरस्य वा प्रपातं पश्यति तदा सोऽत्यन्तमुत्तेजित उल्लसितश्च भवति । प्रपातं दृष्ट्वा स स्नानकरणात् कथमपि रोद्धुं न शक्यते । स शीघ्रमेव प्रपातपार्श्वे गच्छति, गच्छंश्च कण्टकितरोमा भवति । ततः प्रपात-पतितैर्जलशीकरैः किञ्चित् स्नात्वा स प्रपातस्याऽधस्ताद् गच्छति । तावता च तस्योल्लासो हर्षश्चाऽतीव वर्धते । स्वीयहर्षसूचकैस्तीक्ष्णारावैः सह स नृत्यमेवाऽऽरभते । कदाचिच्च नृत्यन्नेव स निकटस्थां लतामान्दोलिकामिव कृत्वा तस्याः साहाय्येनाऽऽन्दोलनानि कुर्वन् स्नाति । ततः पुनरपि स प्रपातास्याऽधः आगत्य जलं विकिरन् नृत्यति स्नाति च ।

आनन्दस्येदृशीं संवेदनां न कोऽपि पशुः पक्षी वाऽनेन प्रकारेण दर्शयन्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृश्यते । यद्यपि साङ्केतिकाभिव्यक्तेरुदाहरणानि तु बहूनि सन्ति । किञ्च (चिम्पान्झी)वानरस्य जनीनसंरचना ९८% मनुष्येण तुल्यैवाऽतस्तस्याऽऽचरणमपि तादृशं सम्भवति ।

**५. वैरप्रदर्शनम्**

वैरस्य संवेदनं तु बहुशः प्राणिषु दृश्यते । तत्र नियमस्तु यथाक्रियं प्रतिक्रियाया अस्ति। साउदी-अरबस्तानदेशे दक्षिण-पश्चिमीये पार्वतप्रदेशे बहवो बबून-वानरा वसन्ति । एकदा मार्गमुल्लङ्घयन् कश्चन बबूनवानरः केनचित् कार्यानचालकेन सङ्घट्टितो मृतः । एतद् दृष्ट्वा तद्यूथीया अन्ये वानरा रुष्टा जाताः । कार्यानं त्वग्रे गतं किन्त्वेते वानरास्तस्य प्रतीक्षारताः दिनत्रयं तत्रैवोपविष्टाः । चतुर्थे दिने यदा तद् यानं प्रत्यागतं तदा तत् प्रत्यभिज्ञाय सर्वैरपि वानरैः सकोलाहलं तद् रुद्ध्वा तदुपरि शिलाखण्डाः प्रक्षिप्तास्तत्काचश्च भञ्जितः ।

वैरवृत्तिप्रदर्शने जापान्-देशस्य मकाक्-जातीया वानरा अपि प्रसिद्धाः । यदा कश्चन वानरो बलवता वानरेण जीयते तदा स जितो वानरः स्वप्रतिस्पर्धिना सह योद्धुमसमर्थोऽपि वैरं गृह्णाति । स स्वमित्राणि स्वजनांश्चाऽऽहूयाऽन्यद् यूथमित्वरकालिकं रचयति । इह च सर्वत्राऽपि स पराजितो वानर एव नेतृत्वं गृह्णाति । ततः प्रतिस्पर्धिवानरस्य कश्चिद् दुर्बलं स्वजनं धृत्वा तं सर्वेऽपि ताडयन्ति, तदपि प्रतिस्पर्धिवानरसमक्षमेव । येन तस्य प्रतिस्पर्धिनो वानरस्य भानं भवेद् यद् इदं दण्डनं तस्य पुराकृतस्य दुष्कर्मणः फलम् । एतद् दृष्ट्वा स प्रतिस्पर्धिवानरो बहुदिनानि यावत् पुनस्तस्य नामाऽपि नाऽऽदत्ते । तस्य च पराजितस्य वानरस्य वैरग्रहणस्य सन्तोषो भवति ।

वैरग्रहणे सर्वथाऽऽक्रमकः पशुरस्ति हस्ती । स वर्षाणामनन्तरमपि स्वीयं शत्रुं पीडकं वा स्मृत्वा तं हन्तुं प्रयतते ।

एवं चिम्पान्झी वानरा अपि वैरिणं पीडकं वा न विस्मरन्ति । यथावसरं च तत्प्रतिशोधं कुर्वन्त्येव ।

**६. ऋणस्वीकारः (आभार-प्रदर्शनम्)**

समुद्रतले एकदैको हम्पबेक्-व्हेलजलचरो धीवराणां जाले पतितः कथञ्चन । जालात् स्वस्य विमोचनार्थं तेन बहु प्रयतितं, किन्तु यथा यथा प्रयतितं तथा तथा सोऽधिकतया तत्र निरुद्धः । व्हेल-जलचरो हि नाऽस्ति मत्स्यः, अतो वारं वारं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन श्वसनार्थं समुद्रस्योपरितलमागन्तव्यं भवेत् । किन्तु जालमासीत् अत्यधिकं दृढमतस्तत् तेन तद् नाऽत्रुट्यत । ईदृश्यां परिस्थितौ तस्य जलचरस्य व्याकुलता वर्धिता । अथ तत्र समुद्रे सामुद्रजीवानामभ्यासार्थं केचन संशोधका तरन्त आसन् । तैरिदं दृश्यं दृष्टम् । शीघ्रमेव ते तद्दिशि प्रस्थिता जालं च कर्तितुमारब्धाः । एतद् दृष्ट्वा स जलचरस्तेषां समक्षमक्षिनिमीलनं कुर्वन् तान् धन्यवादं वदति स्मेव । किञ्चित्कालानन्तरं स यदा बन्धनमुक्तो जातस्तदा सत्वरमुपरितलं गत्वा यथेच्छं श्वसनं कृत्वा पुनरपि तत्राऽऽगतस्तेषां च संशोधकानां प्रत्येकं प्रेम्णा संस्पृशन् चिराय स्थितः । संशोधकानामन्यतमोऽवदत् यदेतन्नाऽऽसीत् क्रीडामात्रं किन्तु तस्याऽऽभारदर्शनमृणस्वीकारो वाऽऽसीत् ।

### ७. वानराणां बुद्धिमत्तायाश्चमत्काराः

एकदा केनचिद् विज्ञानिना चिम्पान्झी-वानरस्य बुद्धिं मातुं छदौ कदली-फलगुच्छकं तथा लम्बितं यथा तस्य वानरस्य हस्ते तदेवमेव नाऽऽयायात् । ततो भित्तिपार्श्वे काचन लघ्व्यः काष्ठपेटिका अपि स्थापिताः । तास्तावल्लघ्व्यः आसन् यत् स वानरस्तास्वन्यतमां संस्थाप्याऽपि कदलीफलानि ग्रहीतुं शक्तो न स्यात् । किन्तु स वानरोऽतीव चतुर आसीत् । तेन सर्वं दृष्ट्वा स्वबुद्ध्या कदलीफलानां स्वस्य चाऽन्तरं मित्वा, तदधः उपर्युपरि पेटिकाद्वयं च मुक्त्वा कदलीफलानि गृहीतानि । ईदृशं गणनं तर्कणं च कर्तुं प्रायो मनुष्या एव क्षमा नाऽन्ये प्राणिनः ।

किन्तु, एतेषां चिम्पान्झीवानराणां मर्यादेयं यत् तेऽन्यान्येषूपयोगिकार्येषु सहायार्थं संस्कर्तुमशक्याः । तदर्थं तु बबूनजातीया मकाकजातीयाः केपुचिनजातीया वा वानरा उपयोगिनः । मलयेशियादेशे मकाकवानराः स्वस्वाम्यर्थं नालिकेर-वृक्षेभ्यस्तत्फलानि चिन्वन्ति । दक्षिणामेरिकायां जायमानाः केपुचिनजातीया वानराः पक्षाघात(paralysis)रोगिणां परिचर्यां कुर्वन्ति । ते वानरा रोगिणः कवलक्षेपेण भोजयन्ति, तेषां वस्त्राणि क्षालयन्ति, तेषां कृते च चाय्-कॉफिपेयमपि प्रगुणीकुर्वन्ति । ईदृशानि सङ्कीर्णकार्याणि कुर्वाणा वानरा एते नूनं बुद्धिमन्त एव !

एवं बबूनजातीया वानरा अपि बहूनि सङ्कीर्णकार्याणि कुर्वाणा स्वबुद्धिमत्तां प्रमाणयन्ति । दक्षिणाफ्रिकादेशे केपटाउन्-पोर्टएलिझाबेथनगरयोर्मध्ये यो रेल्-मार्गोऽस्ति तत्रैको रेल्-सङ्केतदर्शकः (Signalman) कार्यं कुर्वाण आसीत् । तस्य नाम जेम्स्-एडविन्-वाइड्-इत्यासीत् । एकदा स एकस्माद् रेलयानात् अपरस्मिन्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेल्याने कूर्दन् सन्तुलनाद् भ्रष्टो रेल्-यानाधस्तादपतत् । तेन तस्य द्वावपि पादौ क्षुण्णौ । अत: स्वकार्यं कर्तुमक्षमत्वात् स रेल्-अधिकारिभि: पदान्नि:सारित: । किन्तु स स्वकार्यकरणार्थं तदाऽपि कृतनिश्चय आसीत् । अतस्तेन काष्ठमयौ पादौ निर्माप्य धृतौ । ततो रेल्-अधिकारिणो विज्ञप्य चतुश्चक्रकं वाहनमेकं निर्मापितं यद् रेल्-मार्गे चलेत् । तेन च स सङ्केतस्थानं यथाकालं प्राप्नुयात् ।

एतत्साधनद्वयेन तस्य क्षमता यद्यपि वृद्धिङ्गता, रेल्-अधिकारिभि: स पुनरपि तत्पदे नियुक्तश्च, तथाऽपि तत्कार्यं तस्य कृतेऽतीव श्रमपदं सञ्जातम् । अथैकदा स किञ्चित्कार्यार्थं कृष्युत्पन्नसमितिं प्रति गतस्तदा तेनैको बबूनवानरो गन्त्रीं वाहयन् दृष्ट: । एतेन हृष्ट: स वानरस्वामिपार्श्वे स्वकृते तं वानरं याचितवान् । तस्याऽङ्गवैकल्यं दृष्ट्वा वानरस्वाम्यपि सहानुभूत्या तस्मै वानरमर्पितवान् । सवानर: स स्वस्थानमागतो वानराय च कार्यार्थं सूचना: दत्तवान् । सोऽपि वानरस्तस्य सर्वा अपि सूचना: पालयन् अल्पेनैव कालेन सर्वमपि तत्कार्यं शिक्षितवान्, 'जेक् ध सिग्नल्मेन (Jack the Signalman)' इत्यादरसूचकं नाम च प्राप्तवान् ।

प्रत्यहं प्रात: स वाइड्-महोदयं चतुश्चक्रिकायामुपवेश्य सङ्केतस्थानं प्रापयति स्म । ततस्तत्तत्सङ्केतस्थानं कार्यान्वितं निष्क्रियं वा यथासूचनं करोति स्म । रेल्-यानचालकाय कुञ्चिकायुतं वलयं (Ring) अग्रिमे स्थानके प्रापयितुमर्पयति स्म । इन्धनार्थमागतानां यानानां मुख्यमार्गात् रेल्-यार्डगमनमार्गे प्रापयितुं स रेल्मार्गं (track) अपि परावर्तयति स्म । एतदवसरे च तर्कशक्तेर्विचारशक्तेश्चाऽवश्यमुपयोग: कर्तव्यो भवेत् । यतो यदा यानमिन्धनमिच्छेत् तदा चालकश्चतुर्वारं वंशीशब्दं (whistle) वादयेत् । तच्छ्रुत्वैव यानस्य मार्गपरावर्तनं कर्तव्यम् । एतदपि स वानरो विना मार्गदर्शनं करोति स्म । त्रिवारं पञ्चवारं वा वंशीवादने स तत्परावर्तनं नैव करोति स्म ।

एकदा कयाचिन्महिलया सुरक्षाविषयकं प्रश्नमुत्थाप्य तं वानरं प्रति रेल्-संस्थायामधिक्षेप: कृत: । तदा रेल्-अधिकारिभिस्तस्य परीक्षा कृता । बहुप्रकारेषु सङ्केतदर्शनेषु स सर्वथोत्तीर्णो जात: । सङ्केतदर्शककार्यं स अष्टौ वर्षाणि यावत् कृतवान् । एतावता तेन सहस्रश: सङ्केता दर्शिता: । किन्तु कदाऽप्येकस्मिन्नपि सङ्केते तेन क्षतिर्नैव कृताऽऽसीत् । ततस्तस्य मरणं क्षयरोगेण जातमतो रेल्-अधिकारिभिस्तस्य कर्परं सङ्ग्रहस्थाने स्थापितं, तच्छायाचित्रमयं सङ्ग्रहस्थलं च



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेल्-स्थानके तस्य सङ्केतकक्षस्य समीप एव स्थापितम् ।

एवमन्योऽपि बबूनवानरो दक्षिणाफ्रिकादेशे प्रिटोरियानगरपार्श्वस्थे रेल्मार्गे सङ्केतदर्शककार्यं कृत्वा विश्रुतो जातः । एतत्कार्यकरणार्थं प्रत्यहं तस्य सार्धसप्त-पेन्स् दीयन्ते स्म । तस्य नामाऽऽसीत्-जोक् द सिग्नलमेन् ॥

अपरोऽपि बबून वानरः स्वबुद्धिमत्तया जगति विख्यातो जातः । स प्रथमे विश्वयुद्धे दक्षिणाफ्रिकीयसैन्येन सह भागं गृहीतवानासीत् । तस्य कार्यं तु सैन्यदलस्य रक्षकत्व(Sentary)मासीत् । रात्रौ यदि शिविरसमीपे कस्यचिद् गतिविधिर्दृश्येत तदा स सैनिकान् जागरयति स्म । खाते उपविश्य युध्यमानानां सैनिकानां कृते नूतनगोलकानामानयनं, व्रणितानां कृते औषधानयनं, युद्धभूमौ यत्र तत्रैवमेव पतितानां शस्त्राणां स्वशिविरे आनयनमित्यादीनि विषमकार्याण्यपि स सहजतयाऽकरोत् । एतेन तुष्टाः सेनापत्यादयस्तस्य पदोन्नतिं कृतवन्तो वीरताचन्द्रकमपि च तस्मै अर्पितवन्तः ।

एतैः सर्वैः प्रसङ्गैर्ज्ञायते यत् प्राणिषु (पशु-पक्षिषु) अपि विविधसंवेदनानि भवन्त्येव, यथाकालं च ते तानि विविधैर्व्याजैः प्रदर्शयन्त्यपि । तथा तेषु बुद्धिमत्ताऽपि विद्यत एव, परं यथासंस्कारं तस्य प्रकटनं विकासश्च भवति । अत एवं न मन्तव्यं यदेते सर्वथा संवेदनरहिता बुद्धिहीना वा भवेयुः ।

[**आधारः** - गूर्जरभाषायां प्रकाश्यमाना
**सफारी** - इति विज्ञानविषयिकी मासपत्रिका]

**श्रीवृद्धिर्नखवच्छेद्या न धार्येव कदाचन ।**
**प्रमादात् स्खलिते क्वाऽपि समूलाऽपि विनश्यति ॥**

(उपदेशतरङ्गिणी)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सरलाः स्याद्वादसिद्धान्ताः - १

**मुनित्रैलोक्यमण्डनविजयः**

स्याद्वादं ज्ञातुमिच्छुका बहवो भवन्ति । तदर्थं यद्यपि स्याद्वादस्वरूपस्य सामान्यतः परिचायकं साहित्यं लभ्यते एव, तथापि वस्तुतः तामिच्छां पूरयितुं तैः खण्डनमण्डनादिविनिर्मुक्तं सरलविवेचनयुतं स्याद्वादसिद्धान्तनिरूपणमपेक्ष्यते । तच्चाऽलभमानास्ते खिद्यन्ते । स्यात्तेषामपेक्षापूर्त्तिः, स्याच्च कठिनचर्चामन्तरेणाऽपि स्याद्वादतत्त्वावगम इति धियाऽऽरब्धेयं श्रेणी ।

तत्र प्रथममुत्पादविनाशस्वरूपमधिकृतम् । विषयोऽयं शास्त्रवार्त्तासमुच्चयग्रन्थोपरि महामहोपाध्यायश्रीयशोविजयविनिर्मित-स्याद्वादकल्पलताटीकातो (स्त. १ का. ४७-४९) गृहीतः । अत्र यत् तत्त्वं तद् महामहोपाध्यायप्रज्ञाविलसितमेव । केवलं प्रकारान्तरेण प्रस्तुतीकरणे एव मम प्रयत्नः ।

(१)

**शिष्यः** [१]मत्थएण वंदामि भंते ! भवतामानुकूल्यमस्ति चेत् किञ्चित् प्रष्टुमिच्छामि ।

**आचार्यः** कामं पृच्छतु भवान् । समीचीनः प्रश्नस्तु ज्ञानप्राप्तेर्मूलमेव ।

**शि०** प्रभो ! मया पठितं यत् "तिलेषु प्राग् विद्यमानमेव तैलं तिलसङ्घातादुत्पद्यते, रेणुषु प्राग् नास्ति तैलं ततो रेणुसङ्घाताद् नोत्पद्यते । एवं त्र्यणुके उपलभ्यमानं स्थूलत्वं तत्कारणेषु परमाणुषु विद्यमानमेव भवति ।" किमेतत् सत्यम् ?

**आ०** कोऽत्र संशयः ? येषु यद् भवति तदेव तेषां समूहादुत्पद्यते इत्यभिप्रायकः 'तत्सङ्घातजन्यत्वस्य तत्राऽस्तित्वव्याप्यत्व'मिति नियमोऽभ्युपेय एव ।

**शि०** किन्तु यत् पूर्वं येषु पृथगवस्थायां नाऽऽसीत् तत् तेषां सङ्घातादुत्पन्नमिति कथं न स्वीक्रियते ?

**आ०** एवं चाऽसत्कार्यवादो[२]ऽभ्युपगतः स्यात् । तथा च यथाऽसतो घटस्योत्पत्तिर्भवति तथाऽसतः शशशृङ्गस्योत्पादः कथं न स्यात् ?

---

१. मस्तकेन वन्दे भगवन्तः ।

२. 'पूर्वं (= कारणकाले) असतः कार्यस्य उत्पत्तिर्भवति' इति मतमसत्कार्यवादः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शि० कारणाभावादेव कार्यस्य शशशृङ्गस्य नोत्पत्तिः ।

आ० तस्यैव कारणाभावः किमर्थमित्यपि विचार्यताम् ।

शि० तर्हि किं सत्कार्यवादोऽस्माभिरभ्युपेयः ?[1]

आ० सर्वथा न। तत्राऽपि बहवो दोषाः । यथा- कार्यं यदि स्वोत्पत्तेः पूर्वमपि स्यात्तर्हि तदाऽप्युपलभ्येत । न चोपलब्धिः ।

शि० साङ्ख्याः कथयन्ति यत् कार्यस्य तदानीं तिरोभावाद् नोपलभ्यते तत् ।

आ० असत्यमेतत्, यतस्तिरोभावस्य व्याख्यैव कर्तुं न शक्यते । तिरोभावस्याऽर्थो यद्युपलम्भाभावः तर्हि 'उपलम्भाभावस्य कारणं तिरोभावः, स चोपलम्भाभावरूप' इति को वा शृणुयात् ? व्यञ्जकाद्यभाव एव तिरोभाव इति उच्यते चेत् सत्कार्यवादिनां मते तस्य पश्चादपि सद्भावो न भवेदिति सर्वदा तिरोभाव एव तिष्ठेत् । किञ्च, स्वोत्पत्तेः प्रागपि विद्यमानस्योत्पत्तिरेव नाम किम् ?

शि० अस्माभिरसत्कार्यवादोऽपि नाऽनुमन्यते, सत्कार्यवादोऽप्यस्मभ्यं न रोचते, तर्हि किमार्हतानामस्माकं सम्मतम् ?

आ० कथञ्चित् सदसत्कार्यवादः । अवधार्यतामेतत् - कार्यस्यांऽशद्वयं भवति - एको द्रव्यमपरः पर्यायः । कार्यं द्रव्यरूपेण स्वोत्पत्तेः पूर्वमपि सद् भवति, तद्रूपेण तस्योपलम्भोऽपि भवति । पर्यायरूपेण च तदसदेव, तद्रूपेण तदुपलब्धिरपि न । पर्यायत्वेनाऽविद्यमानत्वादेव तस्योत्पत्तिरपि सम्भवा ।

शि० कृपया दृष्टान्तेन योजनां दर्शयतु ।

आ० श्रूयताम् । घटरूपकार्येऽशद्वयम् - एको मृत्तिकाद्रव्यम्, अपरश्च जलधारणादि कर्तुं क्षमः तद्योग्यधर्मयुतो मृदो विशिष्टाकारः (= पर्यायः) । मृत्तिकारूपेण घटः पूर्वमेवाऽऽसीत्, नाऽऽसीच्च तथाविधविशिष्टावस्थारूपेण । तद्रूपेण तस्य कुम्भकारादिप्रयत्नेनोत्पत्तिः ।

शि० परमाणुषु सदेव स्थूलत्वं त्र्यणुके उत्पद्यते इत्यत्राऽपि किमीदृश्येव योजना ?

आ० कः संशयोऽत्र ? स्याद्वादसिद्धान्ताः सार्वत्रिकाः । प्रकृते इयं प्रक्रिया-

---

१. 'कार्यं कारणकालेऽपि विद्यमानमेव भवति' इति मतं सत्कार्यवादः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणूनां त्र्यणुकादिसङ्घातकाले एकत्वसङ्ख्या-परस्परसंयोग-महत्परिमाण-चाक्षुषजनकत्वादि-पर्यायैरुत्पत्तिः, यद्वशादेकं महत् त्र्यणुकमित्यादि प्रतीतिः बहुत्वसङ्ख्या-विभाग-अणुपरिमाण-चाक्षुषजनकत्वाभावादि-पर्यायविशिष्टानां च तेषां निवृत्तिः । एवं स्थूलत्वं = महत्परिमाणवत्त्वं पूर्वमणुरूपेणाऽऽसीत्, पर्यायरूपेण च नाऽऽसीदिति सिद्धम् ।

**शि०** एवं सति 'तत्तदवयविवाचकशब्द(घटादि)व्यपदेश्यपर्यायविशिष्टाण्वतिरिक्तमवयविद्रव्यं नाऽस्ती'ति निर्णयः कर्तुं शक्यते ?

**आ०** अवश्यम्, समीचीननिर्णय एषः । शतमाषकापेक्षया शतमाषकारब्धेऽवयविनि किमधिकं गुरुत्वमनुभूतम् ? पृथगवयविनि वस्तुतो मानं न विद्यते ।

**शि०** अवगतं खलु तत्त्वं भवत्कृपया ।

( २ )

**शि०** प्रभो ! सम्मतिटीकाकारा वदन्ति यद् आत्मादिद्रव्याणां विज्ञानादि-पर्यायोत्पत्तौ न सहभागिता, द्रव्याणां पूर्वमेव निष्पन्नत्वात् । किमिदं तथ्यम् ?

**आ०** सत्यमेव कथयन्ति ते ।

**शि०** तर्हि परमाणूनामेव तत्तत्पर्यायैरुत्पादं बोधयतां भवद्वचनानां कथं सङ्गतिः ? अणवोऽपि पूर्वमेव निष्पन्ना इति उत्पादे घटका न भवेयुः ।

**आ०** विभिन्ननया[१]पेक्षया क्रियमाणयोर्विधानयोर्विभिन्नतैव भवेत् खलु ? प्रकृते इत्थं नययोजना-द्रव्यार्थिकनया[२]नुसारिणां मते उत्पादात् पूर्वं द्रव्यस्य पर्यायविशेषेणाऽवस्थानम्, उत्पादानन्तरं च तस्यैव तदन्यपर्यायेण स्थितिरिति तेन रूपेण द्रव्यस्याऽनिष्पन्नत्वात् तस्याऽप्युत्पत्तौ सहभागिता । यथा घटोत्पत्तेः पूर्वं कुशूलविशिष्टमृदोऽवस्थानम्, उत्पत्तेः पश्चाच्च घटविशिष्टमृदः ।

---

१. नयः = विचारणाप्रकारः ।

२. प्राधान्येन द्रव्यमात्रग्राही द्रव्यार्थिकनयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शि० एतदपेक्षयैव भवन्तः तत्तत्पर्यायविशिष्टपरमाणूनामुत्पादविनाशौ प्रतिपादितवन्तः स्युः ।

आ० सम्यगवधारितं भवता । पर्यायार्थिकनयावलम्बिनस्तु[1] स्वीकुर्वन्ति यत् कार्योत्पत्तेः पूर्वं द्रव्ये पर्यायविशेषस्य सत्त्वम्, उत्पत्त्यनन्तरं तु तदन्यपर्यायस्य विद्यमानता । द्रव्यस्य तु पूर्वमेव निष्पन्नत्वान्नोत्पत्तौ घटकतेति । यथा घटोत्पत्तेः पूर्वं मृदि कुशूलपर्यायस्य सत्त्वम्, उत्पत्तेः पश्चाद् घटपर्यायस्य । सम्मतिटीकाकृतः प्रतिपादनमेतं नयमनुसरति ।

शि० भवद्भिः तत्त्वं बोधयित्वाऽनुगृहीतोऽहम् ।

(३)

शि० प्रभो ! भवद्भिः पूर्वं यद् बोधितं तदनुसारं त्विदमायातम्- अणव एव परिणामात् परिणामान्तरमुपसर्पन्तीति । तत्रैवं नियमं कर्तुं शक्यते यत् पूर्वपरिणामनाशे एवोत्तरपरिणामोत्पादः ।

आ० कथमेवं निर्णेतव्यम् ?

शि० यावद् मृदणूनां घटपरिणामेनाऽवस्थितिस्तावन्न कपालपरिणामेनोत्पत्ति-रित्यतः ।

आ० तन्तुपरिणतानामेवाऽणूनां पटपरिणामप्राप्तिं कथं विस्मरसि ?

शि० तत्राऽपि तन्तुपरिणामविनाशे एव पटावस्थोत्पादः ।

आ० अहो भवतो वैदग्धी ! पटे तन्तवः कदाऽपि न दृष्टाः ? नष्टस्याऽप्रत्यक्षत्वनियमो विस्मृतः ? पटद्वयसंयोगाज्जाते महापटे 'अयं पटः' 'इदं पटद्वय'मिति प्रतीतिद्वयं नाऽनुभूतम् ?

शि० भवत्कथनस्याऽयमाशयो मया गृहीतः - परिणामान्तरोत्पत्तिं प्रति पूर्वपरिणामेनाऽवस्थितिर्न बाधिकेति ।

आ० केन तथा कथितम् ? घटकपालयोर्दृष्टान्तं त्वया स्वयमुक्तमपि विस्मृतम् ?

शि० इदानीं भवन्त एव शरणम् । अहं तु किमपि निर्णेतुं न पारयामि ।

आ० वत्स ! हताशो मा भूः । त्वज्जिज्ञासामुत्तेजयितुमेवाऽहमेतादृशं जालं रचितवान् । सावधानीभूय शृणु - पूर्वावस्थानाशेनैवोत्तरावस्थोत्पाद इति

---

१. प्राधान्येन पर्यायमात्रग्राही पर्यायार्थिकनयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वदवधारितो नियम आर्हतैरङ्गीकृत एव । परं नाशो द्विविधः-समुदय-विभागजनितः समुदयसंयोगजनितश्च । आद्यः पटात् तन्तूनां पृथक्करणे पटनाशरूपः । मुद्गारपाताज्जायमानो घटनाशोऽप्ययमेव । द्वितीयः तन्तुसंयोगात् पटे जायमाने तन्तुनाशरूपः । घटाकारग्रहणकाले मृत्पिण्डविनाशोऽस्मिन् प्रकारे एवाऽन्तर्भवति । अयमर्थान्तरगमनमित्यपि परिचीयते ।

**शि०** स्थलद्वयेऽपि पूर्वावस्थाविनाशः समान एव । तथाऽपि घटध्वंसानन्तरं कपालकाले न घटप्रतीतिः, पटकाले च तन्तूनां प्रतीतिरिति किंकृतोऽयं विशेषः ?

**आ०** स्वरूपत एव । समुदयविभागजनितध्वंसानन्तरं यस्य ध्वंसस्तस्य न प्रतीतिः, यथा - विदारणान्तरं पटस्य, स्फोटनानन्तरं घटस्य वा । अर्थान्तरगमने तु पूर्वावस्थाया यद्यपि नाशः, तथाऽपि स नाशः पूर्वावस्थाप्रतीतिं न बाधते । यथा पटे तन्तुप्रतीतिः, घटे मृत्तिकाप्रतीतिर्वा । जातं सर्वं स्पष्टम् ?

**शि०** आम्, गुरुदेव !

**आ०** इतोऽपि किञ्चिद् बोद्धव्यमस्ति । इमावुभौ विनाशौ शास्त्रे संमीलितरूपेण 'समुदयजनित' इत्युच्येते । अयं स्वाभाविकोऽर्थात् पुरुषप्रयत्नाजन्योऽपि सम्भवति, प्रायोगिकोऽर्थात् पुरुषप्रयत्नजन्यश्चाऽपि सम्भवति । अभ्रविनाशः अङ्कुरकाले बीजविनाशश्चाऽऽदिमः । प्रायोगिकस्तु दर्शित एव ।

**शि०** प्रभो ! धर्मास्तिकायादिष्वपि स्वाभाविको विनाशः सम्भवतीति मया श्रुतमासीत् । समुदयजनितस्तु तत्र न सम्भवति, तेषां प्रदेशानां[१] सर्वदाऽविभक्तत्वात् । तर्हि स कीदृशः ?

**आ०** वदामि । धर्मास्तिकाये[२] गत्याधारतास्वभाव इति त्वं जानास्येव । यस्मिन् क्षणेऽधिकृतपदार्थे गतिर्नाऽस्ति, तस्मिन् क्षणे धर्मास्तिकाये तत्पदार्थगत्यनाधारतापर्यायः । तदनन्तरक्षणे तत्पदार्थे गत्युत्पादे

---

१. स्कन्धात् (समूहात्) अपृथग्भूतः परमाणुवन्निरंशोऽन्तिमावयवः प्रदेशः ।

२. अविभक्तप्रदेश्यनाद्यनन्तं लोकत्रयव्यापि गतिसहायकस्वभावं द्रव्यं धर्मास्तिकायः । प्रदेशानां समूह 'अस्तिकाय' इत्युच्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मास्तिकाये तस्य पर्यायस्य नाशः । एवं पर्यायनाशे द्रव्यनाश इत्यपि वक्तुं शक्यते - क्षणध्वंसे क्षणविशिष्टध्वंसवत् । एवमधर्मास्तिकाया[१]-दिष्वपि । नाशोऽयं शास्त्रे 'एकत्विकनाश' इत्युच्यते ।

**शि०** एवं चोपचयेनेदं स्यात् । नाशो द्विविधः - स्वाभाविकः प्रायोगिकश्च । आद्य एकत्विकः समुदयजनितश्च । द्वितीयस्तु समुदयजनित एव । उभयत्र समुदयजनितो द्विविधः - समुदयविभागजनितोऽर्थान्तर-गमनलक्षणश्च । अनयोराद्यः स्वप्रतियोगिप्रतीतिबाधकः, द्वितीयस्तु न तथेति ।

**आ०** सुष्ठु धारितं भवता ।

---

१. स्थितिसहायकं द्रव्यमधर्मास्तिकायः, तदपि लोकत्रयव्यापि अविभक्तप्रदेश्यनाद्यनन्तं च । आकाशास्तिकायः पुनर्लोकालोकव्याप्यविभक्तप्रदेश्यनाद्यनन्तमवकाशदानस्वभावं द्रव्यम् ।

*आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां*
*मूकत्वं मितभाषितां वितनुते मौग्ध्यं भवेदार्जवम् ।*
*पात्रापात्रविचारसारविरहो यच्छत्युदारात्मतां*
*मातर्लक्ष्मि ! तव प्रसादवशतो दोषा अपि स्युर्गुणाः ॥*

*(उपदेशतरङ्गिणी)*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आस्वाद:

# काव्यविषये जिनसेनाचार्यस्य गम्भीरा विचारा:

एच्. वि. नागराजराव्

कर्णाटकदेशोत्पन्नेषु संस्कृतकविषु अग्रगण्यः पूज्यो जिनसेनाचार्यः । अस्य कवेः गुरुः जयधवलायाः कर्ता भट्टारकवीरसेनः । जिनसेनो बाल्य एव वैराग्यशाली भूत्वा ब्रह्मचार्यासीत् । सरस्वती स्वयं तस्य सेवां कुर्वतीवाऽशोभत। बङ्कापुरं जिनसेनाचार्यसेवाया मुख्यं क्षेत्रमासीत् । क्रिस्तशकनवमशतके जिनसेनाचार्यः कर्णाटभुवम् अलञ्चकारेति वक्तुं शक्यं यतो राष्ट्रकूटचक्रवर्ती अमोघवर्षनृपतुङ्गः प्रतिदिनं जिनसेनपादौ प्रणमति स्मेति गुणभद्रवचनप्रामाण्याद् ज्ञायते ।

जिनसेनस्य मुख्या कृतिः - आदिपुराणम् । तस्मिन् प्रथमतीर्थङ्करस्य श्रीवृषभनाथस्य तथा तत्पुत्रस्य भरतचक्रवर्तिनो जीवितकथा मुख्यतया वर्ण्यन्ते । कृतिरपूर्णा । केवलं द्विचत्वारिंशदध्यायाः (अथवा पर्वाणि) तत्र उपलभ्यन्ते । उत्तरो भागः कर्तुः शिष्येण गुणभद्राचार्येण रचितः । ग्रन्थारम्भे सिद्धसेनसमन्तभद्रादीन् पूर्वसूरीन् स्मरति जिनसेनाचार्यः । ततः कवेः काव्यस्य च विषये बहून् विषयान् कोमलया प्रसन्नया वाचा प्रस्तौति ।

या कविता धर्माङ्गत्वं प्रतिपद्यते, सैव श्रेष्ठेति जिनसेनस्य स्पष्टः अभिप्रायः । यदाह —

त एव कवयो लोके त एव च विचक्षणाः ।
येषां धर्मकथाङ्गत्वं भारती प्रतिपद्यते ॥
धर्मानुबन्धिनी या स्यात् कविता सैव शस्यते ।
शेषा पापास्तवायैव सुप्रयुक्ताऽपि जायते ॥ इति

कविताप्रपञ्चोऽन्यः, धर्मप्रपञ्चोऽन्यः । सद्यः परनिर्वृतिरेव कवितायाः परं प्रयोजनम् इति पाश्चात्यानां दृष्टिः । Art for art's sake इति ते भावयन्ति । किन्तु कविता का कला वा यदा धर्ममार्गादन्यत्र चलति, तदा सा पापस्य कारणं भवति । धर्मस्य प्रतिष्ठापनायाऽधर्मस्य निवृत्तये च कवितायाः कलायाश्चोपयोगः स्यादिति जिनसेनाचार्यस्य मतम् । 'सुप्रयुक्ताऽपि' इति पदेऽत्रावधानं देयम् । कविना रचितं व्याकरणोचितं, रम्यमाकर्षकं च स्यान्नाम । आलङ्कारिकाः काव्यं रसवदिति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्वनिरिति वा प्रशंसन्तु नाम । यदि तज्जनान् अधर्मे प्रवर्तयति, तन्न ग्राह्यम् - इति जिनसेनाचार्यस्य स्पष्टोऽभिप्रायः । वदति सः —

केचिन्मिथ्यादृशः काव्यं ग्रथ्नन्ति श्रुतिपेशलम् ।
तत्त्वधर्मानुबन्धित्वान्न सतां प्रीणनक्षमम् ॥ इति ।

काव्यप्रकाशादिषु ग्रन्थेषु उत्तमकाव्यस्योदाहरणत्वेन नीचविचारप्रचोदकानि पद्यानि उदाह्रियन्ते । यथा -

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याऽज्ञातपीडाशमे
वापीं स्नातुमितो गताऽसि न पुनस्तस्याऽधमस्याऽन्तिकम् ॥

कस्याश्चित् कुटिलायाः कुलटायाः कथाऽत्र कथिता । दूतीत्वेन गता रमणेनोपभुक्तेत्यादिरत्र ध्वनिरिति काव्यमिदं श्रेष्ठं ध्वनेरुदाहरणमिति मम्मटो ब्रूते । एतादृशस्य विषयस्य ज्ञानेन किं प्रयोजनम् ? काव्यं किं सिषाधयिषति ? इति प्रश्नः उद्भवति । तत्कालिकी क्षणिकप्रीतिरेव परमं प्रयोजनमिति नोचितम् ।

कवित्वं यः प्रेप्सति, तेन लोकशास्त्रव्युत्पत्तिः प्रथमं सम्पादनीया । अन्यथा विदुषां हास्यस्यास्पदं भवति काव्यम् । तदाह जिनसेनाचार्यः —

अव्युत्पन्नतराः केचित् कवित्वाय कृतोद्यमाः ।
प्रयान्ति हास्यतां लोके मूका इव विवक्षवः ॥

अस्मिन् लोके द्रव्यचोरा इव काव्यचोरा अपि भवन्ति । स्वयं शब्दान् अर्थान् वा संघटयितुं ते न प्रभवन्ति । पूर्वकविवरेण्यानां शब्दार्थान् चोरयित्वा स्वकीयमिव तत्प्रदर्शयन्ति । तादृशान् हीनान् उद्दिश्य ब्रवीति जिनसेनाचार्य इत्थम् —

केचिदन्यवचोलेशान् आदाय कविमानिनः ।
छायामारोपयन्त्यन्यां वस्त्रेष्विव वणिग्ब्रुवाः ॥

आत्मनः कवीन् मन्यन्ते इति कविमानिनः । वस्तुतो न कवयः । तेषामुपमानं वणिग्ब्रुवाः । नीचा वणिजो वणिग्ब्रुवाः पुनरपि वदति जिनसेनाचार्यः —

केचिदन्यकृतैरर्थैः शब्दैश्च परिवर्तितैः ।
प्रसारयन्ति काव्यार्थान् प्रतिशिष्ट्येव वाणिजाः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थचोराः शब्दचोरा उभयचोरा इति बहुधा काव्यचोरा विजृम्भन्ते । प्रायो बाणभट्टस्य पद्यं जिनसेनाचार्येण मनसि निहितमिति भावयामः । हर्षचरितस्याऽऽदौ बाणभट्टेनोक्तम् –

अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ इति ।

केचन कवयः शब्दप्रयोगचतुराः, किन्तु अर्थगौरवं तेषु विरलम् । अन्ये तु सचमत्कारान् अर्थान् प्रतिपादयन्ति, किन्तु शब्दप्रौढिस्तेषु न दृश्यते । एतादृशान् अशक्तान् कवीन् उपदिश्य जिनसेनाचार्यो वक्ति –

केचिद्वर्णोज्ज्वलां वाणीं रचयन्त्यर्थदुर्बलाम् ।
जातुषी कण्ठिकेवासौ छायामृच्छति नोच्छिखाम् ॥
केचिदर्थमपि प्राप्य तद्योग्यपदयोजनैः ।
न सतां प्रीणनायाऽलं लुब्धा लब्धश्रियो यथा ॥

जतुनिर्मितमाभरणमिव अर्थदुर्बलस्य शब्दवैभवम् । लुब्धेन लब्धा सम्पदिव शब्दप्राभवशून्यस्य कविता । लुब्धो धनवान् अपि न कस्मैचिद् ददाति । तथा शब्दमुग्धः कविः स्निग्धमप्यर्थं सहृदयाय दातुं न शक्त इत्यभिप्रायः । एतद्विषये भारवेः पद्यं स्मृतिपथमायाति –

स्तुवन्ति गुर्वीमभिधेयसम्पदं
विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ
सुदुर्लभाः सर्वमनोहरा गिरः ॥ इति ।

किं नाम काव्यमिति प्रश्नः । तस्योत्तरं बहवो बहुधा कल्पयन्ति । जिनसेनाचार्याः तत्स्वरूपमित्थं कथयन्ति –

कवेर्भावोऽथवा कर्म काव्यं तज्ज्ञैर्निरुच्यते ।
तत्प्रतीतार्थमग्राम्यं सालङ्कारमनाकुलम् ॥ इति ।

अलङ्कारो नाम कः ? तत्राऽऽहाऽऽचार्यः –

केचिदर्थस्य सौन्दर्यमपरे पदसौष्ठवम् ।
वाचामलङ्क्रियां प्राहुस्तद्द्वयं नो मतं मतम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति । अत्र भामहवाक्यानां प्रतिध्वनिं शृण्म इति अस्माकं प्रतिभाति । यदाह भामहः स्वीये काव्यालङ्कारे –

रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ।
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥ इति ।

सर्गबन्धो महाकाव्यमिति भामहदण्डिनौ ब्रूतः । अष्टादशवर्णनादिकं च तल्लक्षणे अन्तर्भाव्यते बहुभिः । जिनसेनाचार्यस्तु महाकाव्यमित्थं लक्षयति –

महापुराणसम्बन्धि महानायकगोचरम् ।
त्रिवर्गफलसन्दर्भं महाकाव्यं तदिष्यते ॥ इति ।

एतेन महाकाव्यस्य वस्तु लोकप्रसिद्धं भवेत्, तत्र नायको महत्त्ववान् स्यात्, तत्र धर्मार्थकामानां प्रतिपादनं भवेदिति जिनसेनाचार्यस्य भावः । त्रिवर्गो धर्मकामार्थैः चतुर्वर्गः समोक्षकैः इत्यमरसिंहः । मोक्षरूपं चतुर्थं पुरुषार्थं कस्मात् परित्यक्तवान् आचार्यः ? अन्ये तु चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् इति वर्णयन्ति । मोक्षः शास्त्रमात्रप्रतिपाद्य इति अभिप्रायो वा ?

सर्वेषु काव्येषु गुणा दोषाश्च भवन्ति । तत्र दुर्जनाः दोषान् गवेषयन्ति । सज्जना गुणान् आददते । तद्विषये सोपहासं वदत्येवमाचार्यः –

यतो गुणधनाः सन्तो दुर्जना दोषवित्तकाः ।
स्वं धनं गृह्णतां तेषां कः प्रत्यर्थी बुधो जनः ॥

दोषमन्विष्य गृह्णन्तो दुर्जनाः कवेरुपकारमेव कुर्वन्ति इति सचमत्कारमाह –

दोषान् गृह्णन्तु वा कामं गुणास्तिष्ठन्तु नः स्फुटम् ।
गृहीतदोषं यत्काव्यं जायते तद्धि पुष्कलम् ॥ इति ।

सर्वैर्जनैः कविभिर्भवितव्यमिति राजाज्ञा नास्ति । यस्य प्रतिभा वर्तते स काव्यं रचयतु । प्रतिभाभावे काव्यं रचयितुं प्रसभं न यतनीयम् । तदाह –

आप्तपाशमतान्यन्ये कवयः पोषयन्त्यलम् ।
कुकवित्वाद्वरं तेषामकवित्वमुपासितम् ॥

एतद्विषये भामहवचनम् –



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाऽकवित्वमधर्माय
व्याधये दण्डनाय वा ।
कुकवित्वं पुनः साक्षा-
न्मृतिमाहुर्मनीषिणः ॥ इति ।

एवं मनीषिभिरुक्तेऽपि कुकवयः सर्वत्र विजृम्भन्ते । तान् निवारयितुं ब्रह्माऽपि न शक्नोति । तत्र वदति जिनसेनाचार्यः –

अनभ्यस्तमहाविद्याः कलाशास्त्रबहिष्कृताः ।
काव्यानि कर्तुमीहन्ते केचित् पश्यत साहसम् ॥

इति । अतः केन काव्यक्रियादरः कार्यः ? काव्यकरणे के अर्हाः ? इत्याह –

तस्मादभ्यस्य शास्त्राणि उपास्य च महाकवीन् ।
धर्म्यं यशस्यं शस्यं च काव्यं कुर्वन्तु धीधनाः ॥

एतदेवाऽभिप्रेत्य मम्मटो वक्ति –

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥ इति ।

एवं कविकाव्यविषये गम्भीरा बहवो विचाराः श्रीजिनसेनाचार्येण स्वकाव्ये पूर्वपुराणे निरूपिताः । पूर्वपुराणेन सह गुणभद्राचार्यविरचितम् 'उत्तरपुराणं' संयोज्य महापुराणमिति भणन्ति विचक्षणाः । पूर्वपुराणं न केवलं पुराणम्, अपि तु श्रेष्ठं काव्यम् । देववाणीरसास्वादनासक्तैः सकलैरपीदं काव्यं पठनीयम् । एवं सूचयति कश्चन प्राचीनः कविः –

यदि सकलकवीन्द्रप्रोक्तसूक्तप्रचार-
श्रवणरससचेतास्तत्त्वमेवं सखे स्याः ।
कविवरजिनसेनाचार्यवक्त्रारविन्द-
प्रणिगदितपुराणाकर्णनाभ्यर्णकर्णः ॥

इति शम् । नमो वीतरागाय ॥

90, 9th Cross Naviluraste, Kuvempunagar,
MYSORE 570023



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पत्रम्

मुनिधर्मकीर्तिविजयः

नमो नमः श्रीगुरुनेमिसूरये ॥

आत्मीयबन्धो ! चेतन !

धर्मलाभोऽस्तु ।

वयं सर्वे कुशलाः स्मः । वलसाड-नवसारी-सूरत-वटपद्र-गोधरा-इत्यादिषु नगरेषु विहरन्तो वयं पुनः कर्णावतीनगरे आगतवन्तः स्मः । विहारे भिन्न-भिन्न प्रकृतिवतां जनानां परिचयो जातः । तदा 'जीवनं किं, जीवनस्य सार्थक्यं च कि'मिति प्रश्नाः सञ्जाताः ।

यदा जीवनविषयकं चिन्त्यते तदा ज्ञायते- अहो ! कीदृशं सुन्दरं जीवनं लब्धम्, उत्तमो मनुष्यभवः परिवारश्चाऽवाप्तः । एवं सर्वमप्युत्तममनुकूलं चाऽवाप्तं तथाऽपि जीवने कथमानन्दः प्रसन्नता च न दृश्यते ? कथमुत्साहो न सन्दृश्यते ? सर्वदा मुखेषु परिश्रम उद्वेगो ग्लानिश्चैवाऽनुभूयते । प्रतिपदं विषादः क्लेशश्चैव दरीदृश्यते । सततं जीवै रोदनमेव क्रियते । एतत्त्वाश्चर्यमस्ति यद्-यद्यभीप्सि-तस्याऽप्रापणे तु ग्लानिर्भवत्येव कामं किन्तु मनोवाञ्छिते सिद्धेऽपि लाभान्विते च सत्यपि ग्लानो जायते मनुष्यः । किमसन्तोषो ग्लानिर्वैव जीवनं खलु ?

बन्धो ! जीवनं तु चक्रवत् सततं भ्रमति । न कदाऽपि गिरिवत् स्थिरं भवति । कदाचित् सुखं कदाचित्तु दुःखं, कदाचिद् जीवने सुघटना भवति कदाचित्तु दुर्घटनाऽपि भवति । चक्रवर्तिनां महाराजानां चाऽपि जीवने एष एव क्रमः । अहो ! महात्मनामपि जीवने सुखदुःखानां चक्रं सततं भ्रमत्येव, किन्तु ते महात्मानः सर्वास्वपि परिस्थितिषु समत्वमनुभवन्तः स्थिताः सन्ति । यथा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखेऽनुकूलकाले च हसन्ति, तथैव दुःखे प्रतिकूलकालेऽपि च हसन्त्येव। अनुकूलां प्रतिकूलां च सर्वामपि परिस्थितिं स्वाभाविकतयैव स्वीकुर्वन्ति। तत एव ते जीवने प्रसन्नतामनुभवन्ति। अन्यथा यद् निश्चितमस्ति तत्तु भवत्येव न कोऽपि तदन्यथाकर्तुं शक्तो भवति। कदाचित्त्वेतादृशी स्थितिर्भवति यदाऽस्माभिः कायेन धनेन वा प्राणरक्षार्थं सर्वमपि क्रियते तथाऽपि साफल्यं न प्राप्यते, तर्हि किं करणीयम् ? य एतादृश्यां परिस्थित्यामपि प्रसन्नतामानन्दं चाऽनुभवति तस्यैव जीवनं सफलं तथा वस्तुतस्स एव जीवति, अन्यथा जीवन्नपि स शवतुल्यो ज्ञेयः।

भो ! जीवा द्विधा भवन्ति। केचिज्जीवा उत्साहानन्द-प्रसन्नताया निधिसमा भवन्ति। कस्मिन्नपि कार्ये निरुत्साहिनो न भवन्ति, न च निराशामपि प्राप्नुवन्ति। स्वयं तूत्साहिनो भवन्ति तथैवाऽन्यानपि प्रेरयन्त्युत्साहम्। एतादृशा जीवा एव सिद्धिमवाप्नुवन्ति।

भो ! श्रीकृष्णभगवन्तं स्मर। यदा पाण्डव-कौरवयोर्मध्ये भीषणं युद्धं प्रारब्धं तदाऽर्जुनो महोद्विग्नो जातः। युद्धं न करणीयमिति हतोत्साहो जातः। तस्मिन् काले श्रीकृष्णेनाऽर्जुनः प्रोत्साहितः। तत उत्साहितेनाऽर्जुनेन पुनः सबलं युद्धं कृतम्। अन्ते विजयोऽप्यवाप्तः।

एवमुत्साहिनो जनाः किं किं नाऽवाप्नुवन्ति ? यत्र यत्र गच्छन्ति तत्र तत्राऽऽनन्दस्य प्रसन्नतायाश्च सुगन्धं प्रसारयन्त्येते जीवाः। संसारदुःखेभ्य उद्विग्नजनेभ्यः कौटुम्बिकक्लेशेभ्यश्च सन्त्रस्तजनेभ्य उत्साहरूपौषधं दत्त्वा नूतनं जीवनं ददति। स्वयं हसन्ति, अन्यानपि हासयन्ति। काभ्यो दुःखपरिस्थितिभ्योऽपि सानन्दं सोत्साहं चाऽनुकूलं मार्गमन्वेषयन्ति, किन्तु हतोत्साहीभूय मस्तके हस्तं दत्त्वा न रुदन्ति।

केचिज्जीवास्सदा रुदन्तो निरुत्साहिनो वराकाश्च भवन्ति। कदाचिदपि नवीनरीत्या नूतनदृष्टेर्नवीनविचाराणां च चिन्तनं स्वीकारं चैव न कुर्वन्ति। कदाचित् कोऽपि जनो नवीनविचारं प्रकटयेत्तर्हि तेन को लाभो भविष्यतीत्यादिकं न चिन्तयन्ति, किन्त्वेतेनैतदहितं हानिश्च भविष्यतीति निषेधात्मकविचारा एवोद्भवन्ति तेषां मनस्सु। एवं सदा निषेधात्मकदृष्ट्यैव पश्यन्ति, वर्तन्ते चैते जीवाः। मनोहरपुष्प-मञ्जुलफला-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिभिर्विकसितनन्दनवनं गते सत्यपि जीवानामेतादृशानां दृष्टौ मधुरपुष्पफलादीनि नाऽऽगच्छन्ति, किन्तु कचवर-कण्टकादीन्येवाऽऽगच्छन्ति । एवं येषां दृष्टिरेव मलिना तेषां सर्वमप्यशुभमेव दृश्यते । एते तु सर्वदा निराशायाः पञ्जरे एव बन्धीभूय वसन्ति । ये रुदन्तो गच्छन्ति ते मृत्योः समाचारमानयन्तीति जनश्रुत्यनुरूपं जीवा एते आनन्दक्षणमपि शोकसभारूपेण परिवर्तितं कुर्वन्ति ।

गुरुर्द्रोणाचार्यो युधिष्ठिरादिजनान् पाठयन्ति स्म । एकदा तेन युधिष्ठिरः पृष्टः - भो ! समस्तनगरे कियन्तः सज्जना दुर्जनाश्चेति ज्ञात्वोत्तरं देहि । एतमेव प्रश्नं दुर्योधनमपि पृष्टवान् गुरुदेवः ।

समस्तनगरस्य निरीक्षणं कृत्वा युधिष्ठिर आगतवानुक्तवाँश्च-गुरुदेव ! नगरे न कोऽपि दुर्गुण्यस्ति । सर्वेऽपि सज्जनाः सन्ति, यतस्सर्वेष्वपि कोऽप्येकगुणोऽस्त्येव ।

दुर्योधन उवाच- गुरुदेव ! नगरे एतस्मिन्न कोऽपि सद्गुणी दृश्यते । सर्वेऽपि दुर्गुणिन एव सन्ति, यतस्सर्वेष्वपि कश्चिदेकोऽपि दुर्गुणो विद्यते एव ।

बन्धो ! वयं सर्वेऽपि दुर्योधनस्य वंशजाः स्मः । न वयं केषाञ्चिदपि हितं शुभं वा द्रष्टुं वक्तुं श्रोतुं चाऽपि शक्तास्तर्हि गुणिजनानामादरस्य का वार्ता ? मुद्गेभ्यः कङ्कटुकान् दुग्धाच्च पूतरान् निष्कासयन्तो वयं सद्गुणिजनानां प्रशंसां कर्तुं कथं शक्नुवन्तः ? सत्यं किल ! वयमपि सद्गुणिनां प्रशंसां कर्तुं शक्नुमः, यदि ते सद्गुणिनोऽस्माकं स्नेहिजनाः स्युः । एवं स्वस्मिन् विद्यमानो लघुरपि सद्गुणो दृश्यते, किन्तु अन्येषां जनानां गुणावलयोऽपि न दृश्यन्ते । तथाऽन्येषां जनानां लघुरपि दोषो दृश्यते, अपि त्वात्मनो बहवो दोषा अपि न दृश्यन्ते । उक्तं च-

राइसरिसवमित्ताइं परच्छिद्दाइं पाससि ।
अप्पणो बिल्लमित्ताइं अपि छिद्दाइं न पाससि ॥

नैतत्तु सर्वथोचितमस्ति ।

भो ! ज्ञानिजनास्तु कथयन्ति, यत्ते एव ज्ञानिन आदरणीया गुणिनश्च सन्ति येऽन्येषां दुर्गुणान् निरीक्ष्य मौनमासेवन्ते तथा परेषां लघुमपि गुणं सन्दृश्य प्रसन्नतामनुभवन्ति, तथा निजस्य दोषलवमपि दृष्ट्वाऽऽत्मानं निर्गुणं मन्यन्ते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भो ! लघुर्वा गुरुर्वेति न प्रश्नः केवलं गुण एव पूजनीयः, एवमेव लघुर्वा गुरुर्वा दोषस्तु निन्दनीय एव ! अतो गुणदृष्टिं वर्धयस्व न दोषदृष्टिम् । यावद् निषेधात्मकविचाराश्चित्ते विद्यमानास्सन्ति तावद् विधेयात्मकविचाराणां सद्गुणानां च विकासोऽसम्भव एवाऽस्ति ।

एकः शिष्यो झेनगुरोः समीपे आगतवानुक्तवाँश्च-प्रभो ! अहं बौद्धदर्शनस्य गुरोः समीपं गतवान्, शैव-वेदान्तदर्शनस्य गुरोः समीपं गतवान्, किन्तु तत्र न किमपि प्राप्तवान् । अद्याऽत्र भवत्सकाशे आगतवान् । अतो मे दीक्षां ददातु ।

गुरुणा चायपेयं पात्रं चाऽऽनायितम् । स पात्रं भर्तुमारब्धः । पात्रे भृते सति पेयं बहिः पतितम् । तथाऽपि पेयपूरणं गुरुर्न निरुद्धवान् ।

गुरुदेव ! पेयमिदं बहिः पतति ।

गुरुरुवाच - तवाऽपि चित्तमन्यान्येन विषयेण भृतमस्ति । त्वं रिक्तो भूत्वा समागच्छ । अन्यथा मया दीयमानं किमपि नैव स्थास्यति । पात्रात् पेयमिव पतिष्यति ।

बन्धो ! कृषीवलोऽपि वर्ष । कालपूर्वे क्षेत्रे विद्यमानान् कचवर-पाषाण-कण्टकादीन् दूरीकृत्यैव बीजादिकं भूमौ वपति, अन्यथा धान्यादिकं सम्यङ् न रोहति ।

अतो, यदि जीवनं सार्थक्यं करणीयमस्ति तर्हि निषेधात्मकविचारान् तिरस्कृत्योत्साह-आनन्दैर्जीवनं प्रसन्नीकुरु ।

**न विद्यया केवलया तपसाऽपि च पात्रता ।**
**यत्र विद्या-चरित्रे च तद्धि पात्रं प्रचक्षते ॥**
**(महाभारतम्)**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यानुवादः

# बे प्रार्थना

गुर्जरमूलम् - **शैला पण्डित**

(१)

हे ईश्वर !
आजनो दिवस मने
उत्तमपणे जीववानुं बळ आप.
मारी मांगणी
साराये जीवन माटे नथी
आवता महिना माटे नथी
आवता अठवाडिया माटे नथी
आवती काल माटे नथी
पण,
मात्र आजना दिवस पूरती ज छे.
तो
आजे मारा मनने
गुणात्मक विचारोथी छलकावी देजे.
एवा एवा विचारो के जे
- मने साची दिशा तरफ वाळे,
- मने साचा डग भरवामां सहायक थाय,
- मने साचा निर्णयो करवा प्रेरे
बस.
आजनो दहाडो,
आजनो ज दहाडो.
ते मने बक्षेली
शक्तिनो
बुद्धिनो
प्रावीण्यनो,
कुशलतानो,
उत्तमोत्तम उपयोग करी शकुं
एटलुं मने बळ आप.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रार्थनाद्धयम्

अनु. **मुनिधर्मकीर्तिविजयः**

(१)

हे प्रभो !
उत्तमतयाऽद्य जीवेयम्
बलं तादृशं मे देयम् ।
अहं याचे
न समग्रस्य जीवनस्य कृते
नाऽपि आगामिनो मासस्य कृते
न चाऽऽगामिनः सप्ताहस्य कृते
नाऽपि आगामिनो दिवसस्य कृते
परं,
केवलमद्यतनस्य दिवसस्य कृते एव ।
तच्च,
अद्य मम मानसं
गुणात्मकैर्विचारैः पूरयतु
ये मां समीचीनां दिशं दर्शयेयुः
ये च मां सत्यार्थे प्रवर्तयेयुः
सम्यग् निर्णेतुं प्रेरयेयुः
एतावदेव ।
अद्य,
अद्यैव च ।
त्वया प्रदत्तां
शक्तिं
बुद्धिं
प्रवीणतां
कुशलतां च
उत्तमतया यथोपयुञ्ज्यां
तथा बलं देयम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

( २ )

गुर्जरमूलम् - **शैला पण्डित**

हे ईश्वर !
मने अन्धकार रुचतो नथी.
हुं सदाय उजास झंखुं छुं.
अन्धकार पर फिटकार वरसाववो
ए करतां
एक कोडियुं पेटाववुं
हजार दरज्जे रूडुं छे
आजना दिवसने
मारी समस्याना एक अंश तरीके नही,
पण
समस्याना आंशिक उकेल
तरीके निहाळी शकुं
एवी मने सूझ आप.

( २ )

अनु. **मुनिधर्मकीर्तिविजयः**

हे ईश !
मह्यं न रोचते तमः ।
सर्वदा प्रकाश एवाऽभिलाषो मम ।
न धिक्करणीयोऽन्धकारः
किन्तु,
कर्तव्यं दीपप्रकटनं
उत्तम एष प्रकारः ।
अद्यतनं दिवसमहं
न मम समस्याया अंशरूपेण
अपि तु
समस्यायाः परिहाररूपेण
यथा पश्येयं
तथा बोधो देयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यानुवादः

# रवीन्द्रगीतिकाः

अनुवादकः **मुनित्रैलोक्यमण्डनविजयः**

My words that are slight
may lightly dance upon time's waves
while my works heavy with import sink.

(तदाऽपि मम कनीयांसि सर्जनानि विधास्यन्ति
समयवीचीषु कमनीयं नर्त्तनम् ।
यदा मम गरीयांसि निर्माणानि प्राप्स्यन्ति
शनैः शनैः तेष्वेव निमज्जनम् ।)

इमान् शब्दान् कविवरो रवीन्द्रनाथठाकुरो यस्य सर्जनस्य कृते उच्चारितवान् तदासीत्-स्वहस्ताक्षरवितरणकाले निसर्गसान्निध्ये वा कविवरस्य हृदयतः सहजतया प्रस्फुटितानि द्वित्रपङ्क्त्युपेतानि मौक्तिकानि । एभ्यो मौक्तिकेभ्यः कविवरः प्रीत्या 'कबितिका' (कविताया बालिका) इति नाम दत्तवानासीत् । यद्यप्येताः कबितिकाः ठाकुरवर्येण न प्रयत्नेन रचिताः, तथाऽप्यासां शब्दच्छटा भावभङ्गिमा च न केवलं जनानां चित्तमाकर्षत्, अपि तु कठोरविवेचकानामपि प्रशंसामाप्नोत् ।

कविवरेणेमानि लघुकाव्यानि बङ्गभाषयाऽऽङ्ग्लभाषया च विरचितानि । तेभ्य आङ्ग्लकाव्यानां सङ्ग्रहद्वयं प्रकाशितमस्ति 'स्ट्रे बर्ड्झ' फायर फ्लाईझ' च । अत्र संस्कृतानुवादेन साकं प्रस्तुताः कबितिका अनयोः सङ्ग्रहयोरेव ।

आगम्यताम्, आस्वदेमहि कबितिकारसम् ।

The raindrops kissed the earth and whispered,
'We are thy homesick children, mother,
Come back to thee from the heaven.' [Stray Birds, 160]

वर्षाबिन्दवो धरित्रीं चुम्बित्वा मन्दमध्वनन्-
'स्वर्गात् त्वदङ्के प्रत्यागता वयं,
अम्ब ! तव गृहप्रिया बालाः !'

'In the moon thy sendest thy love-letter to me',
said the night to the sun,
'I leave my answers in tears upon the grass.' [Stray Birds, 124]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'चन्द्रो मां प्रति त्वया प्रेषितं त्वत्प्रेमपत्रम्'
संलपितवती निशा मिहिरेण,
'मम प्रत्युत्तरं प्रेषयामि कुशशिरसि तुषारबिन्दुषु' ।

The World has kissed my soul with its pain,
asking for its return in songs. [Stray Birds, 167]

संसारः तद्वेदनाभिः स्पृशति ममाऽन्तःकरणम्,
याचते च तत्प्रतिफलत्वेन गीतानि !

These paper-boats of mine are meant
to dance on the ripples of hours,
and not to reach any destination. [Fireflies, 87]

मामका इमाः पर्णनौकाः,
निर्मिताः समयलहरीषु नर्त्तनार्थम्,
न पुनः किञ्चिल्लक्ष्यप्रापणार्थम् ।

Blessed is he whose fame
does not outshine his truth. [Stray Birds, 296]

धन्योऽस्ति स यस्य यशःपुञ्जः,
नैवाऽऽच्छादयति तस्य ऋतम् ।

Migratory songs wing from my heart
and seek their nests in your voice of love. [Fireflies, 88]

यायावराणि गीतानि मत्स्वान्तत उड्डीय
स्वनीडानि विलोकन्ते तव स्नेहलकण्ठे ।

Set bird's wings with gold, and
it will never soar in the sky. [Stray Birds, 231]

क्रियन्तां विहङ्गमस्य पक्षाः सुवर्णखचिताः,
रुध्यतां तस्य स्वैरविहारो विहायसि ।

My last salutations are to them
who knew me imperfect and loved me. [Fireflies, 252]

तेभ्यो भवतु मम चरमा प्रणतिः,
ये मय्यस्निह्यन्, ममाऽपूर्णतां ज्ञात्वाऽपि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Some have thought deeply and explored
the meaning of the truth
and they are great;
I have listened to catch the music of thy play
and I am Glad. [Fireflies, 210]

केचन गभीरं चिन्तितवन्तः तव रहस्यं साक्षात्कृतवन्तश्च,
ते विश्रुता जाता जगति,
अहं तु केवलं तव लीलासङ्गीतमाकर्णितवान्,
अथ चाऽहं बाढं प्रसन्नः ।

Those who have everything but thee,
my God,
laugh at those who have nothing but thyself. [Stray Birds, 226]

येषां पार्श्वे त्वामतिरिच्य सर्वमस्ति, ते
मम प्रभो !
परिहसन्ति तेषु, येषां सम्पत्तौ न किमप्यस्ति-त्वामतिरिच्य ।

Every Child comes with the message that
God is not yet discouraged of man. [Stray Birds, 77]

प्रत्येकं शिशुरवतरति सन्देशेन समं यद्
ईश्वरोऽधुनाऽपि न त्यक्तवान् मनुष्ये श्रद्धाम् !

The Sun has his simple robe of light,
The clouds are decked with gorgeousness. [Stray Birds, 112]

भास्करेण परिहितं तस्य सामान्यमेव तैजसं दुकूलम्,
मेघमाला तु सज्जा महता वर्णाडम्बरेण साकम् ।

Let this be my last word that
I trust in thy love.

भवतादयं ममाऽन्तिमः शब्दः -
अहं विश्वसिमि तव प्रेम्णि ।

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यानुवादः

# गृह्णन्तु

अनु. सा. धृतियशाश्रीः

सागर खारो छे अेम न कहो पण रत्नो लई लो.
छास खाटी छे अेम न कहो पण माखण लई लो.
कादव खराब छे अेम न कहो पण कमळ लई लो.
माणस खराब छे अेम न कहो पण गुण लई लो.

समुद्रो लवणोऽस्ति-इति मा वदन्तु किन्तु रत्नानि गृह्णन्तु ।
तक्रमम्लमस्ति- इति मा वदन्तु किन्तु नवनीतं गृह्णन्तु ॥
पङ्को मलिनोऽस्ति - इति मा वदन्तु किन्तु पद्मं गृह्णन्तु ।
मनुष्यो दुष्टोऽस्ति - इति मा वदन्तु किन्तु गुणान् गृह्णन्तु ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# उपमानप्रमाणम्

अनुवादः

मूललेखको हिन्द्याम् पं.श्रीदलसुखमालवणिया
अनु. मुनिकल्याणकीर्तिविजयः

**चार्वाकोऽध्यक्षमेकं सुगतकणभुजौ सानुमानं सशाब्दं**
**तद्द्वैतं पारमर्षः सहितमुपमया तत्त्रयं चाऽक्षपादः ।**
**अर्थापत्त्या प्रभाकृद् वदति सनिखिलं मन्यते भाट्ट एतत्**
**साभावं द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥**

पौर्वात्ये जगति विशेषतो भारतवर्षे दर्शनानां षड् विभागाः प्रसिद्धाः सन्ति, यथा-

१. न्यायदर्शनम् (आक्षपाददर्शनम्)

२. वैशेषिकदर्शनम् (काणाददर्शनम्)

३. साङ्ख्यदर्शनम् (कापिलदर्शनम्, अत्र पातञ्जलदर्शनमपि समाविशति समानतन्त्रत्वात्)

४. मीमांसादर्शनम् (जैमिनीयदर्शनम् । अस्य द्वौ विभागौ – पूर्वमीमांसा-उत्तरमीमांसा [वेदान्तदर्शनं] च)

५. बौद्धदर्शनम् (सौगतदर्शनम्)

६. जैनदर्शनम् (आर्हतदर्शनम्)

एतानि सर्वाण्यपि दर्शनानि ह्यात्मवादिदर्शनानि – यथाकथञ्चिदप्यात्म-परमात्म-पुण्य-पाप-बन्ध-मोक्ष-परलोकादितत्त्वानि मन्यन्ते । एतान्यतिरिच्य सप्तमं नास्तिकं दर्शन(चार्वाकदर्शन)मप्यस्ति यत् सर्वथाऽऽत्मादितत्त्वानि न मन्यते केवलं भूतचतुष्टयात्मकमिदं जगदस्तीत्यादिकमेव मन्यते ।

प्रारम्भे यः श्लोकः उद्धृतस्तस्मिन्, ये ये दर्शनावलम्बिनो यति यानि च प्रमाणानि मन्यन्ते तति तानि च नामग्राहमुक्तानि ।

तत्र, **चार्वाकः** केवलं प्रत्यक्षप्रमाणमेव मन्यते । **सुगतमतीयाः काणादाश्च** प्रत्यक्षमनुमानं चेति प्रमाणद्वयं मन्यन्ते । **पारमर्षा** नाम **साङ्ख्याः** पूर्वोक्तद्वयेन सह शाब्दं (आगमं) प्रमाणमपि मन्यन्तेऽर्थात् प्रमाणत्रयं मन्यन्ते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अक्षपादानुयायिनो** हि **नैयायिका** उपमानं शाब्दं प्रत्यक्षमनुमानं चेति प्रमाणचतुष्टयं मन्यन्ते । **प्राभाकरा (मीमांसकैकदेशिनः)** हि तत् प्रमाण-चतुष्टयमर्थापत्त्या सहेति पञ्च प्रमाणानि मन्यन्ते । **भाट्टाः (मीमांसकैकदेशिनः)** हि तत् प्रमाणपञ्चकमेवाऽभावेन सहेति षट् प्रमाणानि मन्यन्ते । (**उत्तर-मीमांसका[वेदान्तिनः]**अप्येतान्येव षट् प्रमाणानि मन्यन्ते ।) **जैनदार्शनिकास्तु** द्वे एव प्रमाणानि स्वीकुर्वन्ते प्रत्यक्षं परोक्षं च । (द्वयोरप्येतयोश्चाऽन्यान्यपि प्रमाणानि यथायथमन्तर्भावयन्ति ।)

एतावतीं भूमिकामुपस्थाप्याऽधुनाऽत्र **उपमानप्रमाणस्य** स्वरूप-प्रामाण्य-फलान्याश्रित्य दार्शनिकानां ये मतभेदास्तान् निरूपयितुमुपक्रान्तम् ।

## १. उपमानस्वरूपम्

उपमानस्वरूपविषये दार्शनिकानां विभिन्नमतानीमानि –

1. वृद्धनैयायिकसम्मतमतिदेशवाक्यम्
2. उपवर्षादिमीमांसकानां वेदान्तिनां च सम्मते सादृश्य-सादृश्यज्ञाने
3. नव्यनैयायिकसम्मतं सादृश्यप्रत्यक्षम्
4. प्राचीनजैनसम्मते सादृश्य-वैसादृश्यज्ञाने
5. नव्यजैनसम्मतं सङ्कलनात्मकं सादृश्यज्ञानम्

तत्र प्रथमं तावत् पश्यामः –

1. **न्यायसूत्र**कारेण ह्युपमानलक्षणमेवं कृतम् - "**प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्** (१.१.६) । अस्य सूत्रस्य व्याख्याने वृद्ध-**नैयायिकस्योद्योतकरा**दीनां च मध्ये मतभेदोऽस्ति । वृद्धा ह्यतिदेश-वाक्यमेवोपमानप्रमाणतया मन्यन्ते । **जयन्तभट्टेन न्यायमञ्जर्यां** वृद्ध**नैयायिक**-मतेनेदं सूत्रमेवं व्याख्यातम् - "अत्र वृद्ध**नैयायिका**स्तावदेवमुप मान-स्वरूपमाचक्षते – सञ्ज्ञा-सञ्ज्ञिसम्बन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्य-प्रतिपादकमतिदेशवाक्यमेवोपमानम् । गवयार्थी हि नागरकोऽनवगतग वय-स्वरूपस्तदभिज्ञमारण्यकं पृच्छति - कीदृग् गवयः ? - इति । स तमाह - यादृशो गौस्तादृशो गवयः - इति । तदेतद् वाक्यमप्रसिद्धस्य प्रसिद्धेन गवा सादृश्यमभिदधत् तद्द्वारकमप्रसिद्धस्य गवयसञ्ज्ञाभिधेयत्वं ज्ञापयतीति **उपमानमुच्यते** ।" **(न्यायमञ्जरी** पृ. १४१)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जयन्तः** कथयति यत् - भाष्यकारस्याऽपि ह्यतिदेशवाक्यमेवोपमान-प्रमाणतया सम्मतम् । एवं मनने च न काऽपि विसङ्गतिरस्ति । (पृ. १४२)

2. **शबरेण** स्वीये **ब्रह्मसूत्रभाष्ये** वृत्तिकारस्यो**पवर्ष**स्य मतमनूदितमस्ति । अनेनो**पवर्ष**सम्मतमुपमानलक्षणं ज्ञायते । यद्यपि [१]भाष्यटीकाकारा अन्ये च ग्रन्थकृत **उपवर्ष**मतं **शबर**मतत्वेनैवोल्लिखन्ति यतः **शबरे**ण स्वीये भाष्ये[२] तल्लिखितमस्ति । **उपवर्ष**सम्मतमुपमानलक्षणं हीदम् - ''उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य'' । (**शाबर.** १.१.५)

**कुमारिलभट्टः** कथयति यत् - अतिदेशवाक्यमेव यद्युपमानतया मन्येत तर्हि तदागमप्रमाणे एवाऽन्तर्भूयेत । अत एव **शबरेण** (अर्थाद् **उपवर्षेण**) उपमानस्येदं नवं लक्षणं स्थिरीकृतमस्ति । एतदनुसारेण सादृश्यमेवोपमानप्रमाणम्[३] । यतस्तेनैव स्मरणविषयेऽसन्निकृष्टे गवि गवयसादृश्यस्य बुद्धिर्भवति । अर्थात् 'गौरस्य गवयस्य सदृशः' इति बुद्धिरुत्पद्यते ।

अग्रे च टीकाकारैः सादृश्यं विहाय सादृश्यज्ञानमेवोपमानप्रमाणमिति स्पष्टीकृतमस्ति । यथा ''पूर्वदृष्टे स्मर्यमाणेऽर्थे दृश्यमानार्थसादृश्यज्ञानमुपमानम्'' । (**शास्त्रदीपिका** पृ. ७४) ।

यथा ह्यनुमानस्य करणं ज्ञायमानलिङ्गस्थाने लिङ्गज्ञानमेव स्थिरीकृतं तथैवाऽत्राऽपि उपमाने सादृश्यस्थाने सादृश्यज्ञानमेव स्वीकृतम् ।[४]

**वेदान्ते**ऽपि सादृश्यज्ञानमेवोपमानतया वर्णितमस्ति । यदाह- ''तत्र सादृश्यप्रमाकरणमुपमानम् । तथा हि - नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः - अयं पिण्डो गोसदृश इति ।

---

१. शाबरे पुनस्तस्याऽऽगमाऽबहिर्भावादन्यथैवोपवर्णितम् । (**श्लोकवा. उप.**२, **तत्त्व** सं०व्या० पृ. ५४४)

२. अयं च गोस्मरणस्येत्यन्तो भाष्यग्रन्थः उपवर्षसम्मत एव, भाष्यकारेण लिखितत्वात् टीकाकारादिभिर्भाष्यत्वेनैवोच्यते । (शास्त्रदीपिका युक्ति० पृ. ७४)

३. शबरेणोपमाने गवयदर्शनं सादृश्यस्थानीयत्वेन स्वीकृतम् । तथा चाऽऽह-अरण्यं गतस्य गवयाख्यमृगविशेषं पश्यतः गोसदृशो गवयः इत्याकारकसादृश्यविशिष्टगवयदर्शनम् । (**शाबरव्या.** पृ. ३७)

४. अनुमायां ज्ञायमानं लिङ्गं तु करणं नहि । (**कारिका०** ६७), सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयकमुपमानम् । (**प्रकरण** पं. पृ. ११०)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनन्तरं चाऽनेन सदृशी मदीया गौरिति । अन्वयव्यतिरेकाभ्यां गवयनिष्ठ-गोसादृश्यज्ञानं करणं, गोनिष्ठगवयसादृश्यज्ञानं फलम्'' (**वेदान्तपरिभाषा** पृ. १७६) ॥

3. यद्यपि **जयन्तेन** वृद्ध**नैयायिका**नां लक्षणस्य सङ्गतिमुपदर्श्य **मीमांसकाक्षेपः** प्रत्युत्तरितोऽस्ति तथाऽपि 'अतिदेशवाक्यमुपमान'मिति मन्यमाना हि **वृद्धनैयायिका** एव केवलमिति स्वीकर्तव्यम् । यतो यान् नैयायिकान् **जयन्तोऽद्यतना** इति कथयति ते सर्वे **उद्योतकराद्याः नैयायिकाः**, स्वयं च **जयन्तो**ऽपि उपमानस्येदं नूतनलक्षणमेवाऽङ्गीकुर्वन्ति समर्थयन्ति च । उक्तन्यायसूत्रस्य नवीनैः कृतां व्याख्यां **जयन्तः** एवं दर्शयति – ''अद्यतनास्तु व्याचक्षते – श्रुतातिदेशवाक्यस्य प्रमातुरप्रसिद्धे पिण्डे प्रसिद्धपिण्डसारूप्य-ज्ञानमिन्द्रियजं सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिफलमुपमानम् ।'' (**न्यायमञ्जरी**, पृ. १४२) ॥

अर्थान्नवीनमतेऽतिदेशवाक्यस्मृतिसापेक्षं सारूप्यप्रत्यक्षमुपमानप्रमाणम् । यदाह- ''तस्माद् यथा लिङ्ग-लिङ्गिसम्बन्धस्मृत्यनुग्रहे सति लिङ्गपरामर्शोऽनुमानं, तच्च प्रत्यक्षं; तथाऽऽगमाहितसंस्कारस्मृत्यपेक्षं सारूप्यप्रत्यक्ष-मुपमानमिति'' ॥ (**न्याय वा.** २.१.४८).

अत्रेदमवधेयं यत् नव्य**नैयायिकानां मीमांसकानां** च सम्मते उपमाने स्वरूपभेदो वस्तुतो नाऽस्ति, किन्तु द्वयोरपि मतयोरुपमानप्रामाण्यस्य कार्यं फलं वा भिन्नमस्ति । अत एव कार्यभेदात् कारणभेदं स्वीकृत्य द्वयोर्वर्णनं भिन्नतया कृतमत्र । तयोश्च फल-कार्यभेदचर्चाऽग्रे वक्ष्यते ।

अन्यच्च, **नैयायिक-मीमांसकयोः** सादृश्य-सारूप्यविषयोऽपि मौलिको मतभेदोऽस्ति । ततश्च द्वयोरपि मतयोः सादृश्यज्ञानं भिन्नप्रकारमेव भवेत् । अत एव द्वयोरपि मतयोः सादृश्यज्ञानस्यैवोपमानत्वेऽपि कथितप्रकारेण मतभेदस्य सत्त्वात् द्वे अपि मते प्रस्तुतवर्णने भिन्नतया परिगणिते ।

4. जैनानाम्[५] **अनुयोगद्वारसूत्रे औपम्य**प्रमाणं निरूपितमस्ति । यस्य कस्याऽपि पदार्थस्य भेदकथनद्वारा तत्स्वरूपवर्णनमिहाऽ**नुयोगद्वारसूत्र**स्य व्याख्याशैली । अत एव तत्रो[६]**पमाप्रमाणस्य** भेदास्तु परिगणिताः किन्तु तल्लक्षणं

---

५. **भगवतीसूत्रे (व्याख्याप्रज्ञप्तौ)** अपि उपमानप्रमाणं निरूपितमस्ति ।

६. से किं तं ओवम्मे ? ओवम्मे दुविहे पण्णत्ते, तं जहा–साहम्मोवणीए अ वेहम्मोवणीए अ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैव निरूपितम्। किन्तु निर्दिष्टाभ्यां साधर्म्योपनीत-वैधर्म्योपनीताभिधाभ्यामुपमा-भेदाभ्यामिदमनुमीयेत यदनुयोगद्वारकृन्मते सादृश्य-वैदृश्यज्ञाने एवोपमाप्रमाणे।

[७]**न्यायसूत्रे** ह्युपमानपरीक्षायाः पूर्वपक्षे निरूपितमिदं यद् यत्राऽ**त्यन्तं, प्रायः एकदेशेन** वा साधर्म्यं तत्रोपमानप्रमाणं नैव भवेत्। तथैतेभ्यस्त्रिभ्योऽन्यः साधर्म्यस्य प्रकार एव नाऽस्ति । अत उपमानप्रमाणमसिद्धमेव । किन्तु, **अनुयोगद्वारे** साधर्म्योपनीतोपमानस्य वैधर्म्योपनीतोपमानस्य च ये त्रयस्त्रयो भेदा उपदर्शितास्ते ह्युक्तपूर्वपक्षिणा निषिद्धा साधर्म्यभेदा एव । यथा –

"से किं तं साहम्मोवणीए ? साहम्मोवणीए तिविहे पण्णत्ते, तं जहा - किंचिसाहम्मोवणीए, पायसाहम्मोवणीए, सव्वसाहम्मोवणीए । से किं तं किंचिसाहम्मोवणीए ? - जहा मंदरो तहा सरिसवो, जहा समुद्दो तहा गोप्पयं, जहा आइच्चो तहा खज्जोओ, जहा चंदो तहा कुमुदो । से किं तं पायसाहम्मोवणीए ? - जहा गो तहा गवयो । से किं तं सव्वसाहम्मोवणीए ? - सव्वसाहम्मे ओवम्मे नत्थि । तहा वि तेणेव ओवम्मं कीरइ जहा अरिहंतेहिं अरिहंतसरिसं कयं ।" (**अनु० पृ. २१७**)

5. जैनानां प्राचीनेऽ**नुयोगद्वारसूत्रे** वर्णितमुपमानप्रमाणमेवा-ऽग्रेतनैर्जैनदार्शनिकैः **प्रत्यभिज्ञाया**मन्तर्भावितमस्ति। तल्लक्षणं च **सङ्कलनात्मकं सम्यग्ज्ञान**मिति निरूपितमस्ति । अस्यां प्रत्यभिज्ञायामतीतानां वर्तमानानां च पर्यायाणां सङ्कलनाया ज्ञानं भवति। यदा चाऽस्याः सङ्कलनाया विषयः सादृश्यं भवेत् तदा तामन्ये दार्शनिका **उपमान**तया वर्णयन्ति जैनाचार्याश्च सादृश्य-प्रत्यभिज्ञानतया निरूपयन्ति[८] ।

## २. उपमानप्रामाण्यम्

उपमानप्रामाण्यविषयकाणि चत्वारि मतान्येतानि-

1. उपमानस्य सर्वथाऽप्रामाण्यम् ।
2. उपमानस्याऽन्यत्राऽन्तर्भावः ।

---

७. अत्यन्त-प्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ **न्यायसूत्र** - २.१.४४ ॥ अत्यन्तसाधर्म्यादुपमानं न भवति, यथा गौरेव गौरिति । प्रायःसाधर्म्यादुपमानं न भवति, यथाऽनड्वानेव महिष इति । एकदेशसाधर्म्यादुपमानं न सिध्यति, न हि सर्वेण सर्वमुपमीयते इति । **न्यायभाष्यम्** ॥

८. **तत्त्वार्थ श्लो० वा०** पृ. १९०, **परीक्षा०** ३.५., **प्रमाणनय०** ३.५. ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

3. उपमानस्य पृथक् प्रामाण्यम् ।

4. उपमानस्य प्रामाण्याप्रामाण्ययोरनेकान्तत्वम् ।

क्रमश एतानि पश्यामः –

1. उपमानस्य सर्वथाऽप्रामाण्यं **बौद्ध**सम्मतम् । **तत्त्वोपप्लवसिंह**कारो **जयराशि**रपि **चार्वाकः** उपमानप्रामाण्यं नैव मन्यते । तमेवाऽनुकुर्वन् **वेदान्ती श्रीहर्षो** जैनश्च **श्रीशान्त्याचार्यो**ऽपि तत्प्रामाण्यं नैव मन्येते ।

**शान्तरक्षितः प्रज्ञाकरगुप्त**श्चेति द्वावपि **बौद्धा**चार्यौ समानतयैवैवं कथयतो यत् - उपमानं प्रमाणमेव नाऽस्ति, यतस्तस्य न किमपि प्रमेयम्[९] । अन्यच्च, यदि सादृश्यप्रतिपादकत**योपमानं** प्रामाण्यं तर्हि वैसादृश्यग्राहकमन्यदपि प्रमाणं स्वीकर्तव्यम्[१०] ।

ततः **शान्तरक्षिते**णोपमान-स्मृत्योरभेदं साधयित्वा स्मृतिवत् तदप्रामाण्य-मपि स्थापितमस्ति । स कथयति यद् - "गवि गवये च कानिचिदवयवानि सन्ति यानि तुल्यप्रत्ययोत्पत्तौ हेतूभवन्ति । एतान्यवयवान्यतिरिच्य नास्ति किञ्चित् सादृश्यं सामान्यं वा पृथग्भूतं यत् तुल्यप्रत्ययोत्पत्तौ हेतूभवेत् । अत एव यदा वयं गवयं पश्यामस्तदा गोगतानां तादृशावयवानां स्मृतिर्भूयोदर्शनेन हेतुना भवति । इदमेवोपमानम् । अत एव स्मृतिरूपत्वात् न तत् [११]प्रमाणम्" ।

सामान्यतः सर्वेऽपीदमेव मन्यन्ते यत्-**चार्वाकः** प्रत्यक्षं प्रमाणतया मन्यते । किन्त्वत्र **तत्त्वोपप्लवसिंहकारो जयराशि**श्चार्वाकत्वेऽपि प्रत्यक्षमपि प्रमाणतया न मन्यते । एवं स्थिते तन्मते उपमानप्रामाण्यस्य प्रश्न एव नोत्तिष्ठते । यदाह[१२] - "प्रत्यक्षमूलकमुपमानं, तदपगमे तस्याऽप्यपगमात्" । **बौद्ध**वत् सोऽपि कथयति[१३] यत् - "सादृश्यरूपो विषय एव यदाऽसिद्धस्तदोपमानं प्रमेयहीनतया प्रमाणं कथं सम्भवेत् ?"

**श्रीहर्षे**णाऽपि **तत्त्वोपप्लवसिंहं माध्यमिकबौद्धां**श्चाऽनुसृत्य प्रत्यक्षादि-

---

९. प्रमेयवस्त्वभावेन, नाऽभिप्रेताऽस्य मानता ॥ (**तत्त्वसङ्ग्रहः** - कारिका १५४३, **प्रमाणवा० - अलं०** पृ. ५७४) ॥

१०. **तत्त्वसं० का०** १५५९, **प्रमाणवा.** पृ. ५७६ ॥

११. **तत्त्वसं० का०** १५४७-१५४९ ॥

१२-१३. **तत्त्वोपप्लवसिंहः** पृ. ११० ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वप्रमाणानि खण्डितानि । अत एव तन्मतेऽपि उपमानस्य प्रामाण्यं नास्ति ।[१४]

**जयन्ते**न **मीमांसक**सम्मतमुपमानं स्मृतावन्तर्भाव्य तदप्रामाण्यं साधितमस्ति । स कथयति यत् – गवयदर्शनेनेयं प्रतीतिर्भवति यद् 'अनेन सदृशो गौर्मया नगरे दृष्टः', एषा च प्रतीतिः स्पष्टतया स्मृतिरेवेति ।[१५]

**अकलङ्का**द्या अन्ये सर्वेऽपि **जैना**चार्याः उपमानं प्रत्यभिज्ञानन्तर्गतमेव मन्यन्ते – इत्येतदग्रे वक्ष्यते एव । किन्तु **न्यायावतारे** आचार्य**सिद्धसेनदिवाकरसूरयः** प्रत्यक्षानुमानागमाख्यानि त्रीण्येव प्रमाणानि निरूपयन्ति । उपमानविषये ते किमपि न कथयन्ति । **शान्त्याचार्या** अपि **न्यायावतार**स्य स्वरचिते वार्तिके बौद्धवत् तच्छब्देष्वेवोपमानमप्रमाणतया साधयन्ति, अन्य**जैना**चार्यवत् तस्य प्रत्यभिज्ञायामन्तर्भावमपि न स्वीकुर्वन्ति । यद्यपीदं तेषां मूलन्यायावतारसमर्थनं कथ्येत, तथाऽप्येवंकरणेन स्वसमयावधिजातस्य समग्रजैनन्यायस्य विकास उपेक्षितो भवति ।

इदमत्र ज्ञेयं यत् – यद्यपि **शान्त्याचार्यै**रुपमानमप्रमाणतया साधितं तथाऽपि यस्मिन् प्रत्यभिज्ञानेऽन्यै**र्जैना**चार्यैरुपमानमन्तर्भावितं तत् तु तैः प्रमाणतयैव मतम् । एतत् त्वन्यद् यदन्ये **जैना**चार्याः प्रत्यभिज्ञां स्वतन्त्रपरोक्षप्रमाणतया मन्यन्ते **शान्त्याचार्या**स्तु तां नैयायिकादिवत् प्रत्यक्षमेव मन्यन्ते[१६] ।

2. इदानीमुपमानस्याऽन्तर्भावविषयको विचारः क्रमप्राप्तः । ये दार्शनिका उपमानं प्रमाणतया तु मन्वन्ते किन्तु पृथक् प्रमाणं तदिति न मन्यन्ते ते हि स्वाभिमते कस्मिंश्चित् प्रमाणे तदन्तर्भावयन्ति । उपमानान्तर्भावविषये निम्नलिखितानि मतान्युपलभ्यन्ते –

(१) आगमेऽन्तर्भावः ।
(२) अनुमानेऽन्तर्भावः ।
(३) प्रत्यभिज्ञायामन्तर्भावः ।
(४) प्रत्यक्षेऽन्तर्भावः ।

---

१४. **खण्डनखण्डखाद्यं** प्रथमपरिच्छेदः ।
१५. **न्यायमञ्जरी** पृ. १४७ ॥
१६. "ननु द्रव्यस्य कुतः सत्त्वसिद्धिः ? प्रत्यभिज्ञाप्रत्यक्षादिति ब्रूमः । तथाहि... प्रत्यभिज्ञा कथं न प्रत्यक्षम् ?" **न्यायावतारवार्तिकं** – श्लोक क्र. ३५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१) प्राचीन**नैयायिका** ह्यतिदेशवाक्यमुपमानप्रमाणतया मन्यन्ते । तदतिदेशवाक्यस्वरूपमुपमानमागमे एवाऽन्तर्भवतीति **मीमांसका वैशेषिकाः साङ्ख्याश्च** कथयन्ति –

- तस्याऽगमाबहिर्भावादन्यथैवोपवर्णितम् ।
  पुरुषप्रत्ययेनैव तत्राऽर्थः सम्प्रतीयते ॥
  तदीयवचनत्वेन तस्मादागम एव सः । (**श्लोकवार्तिकम्** – उप० २,३)
- आप्तेनाऽप्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव ।
  (**प्रशस्तपादभाष्यम्**, पृ. ५७६)
- उपमानं तावद् 'यथा गौस्तथा गवयः' इति वाक्यम्, तज्जनिता धीरागम एव । (**साङ्ख्यतत्त्वकौमुदी**, कारिका-५)

अत्र यद्यपि **मीमांसका**नामुपमानं पृथक् प्रमाणतयेष्टमेव तथाऽपि तन्मतेनैतल्लक्षणं **नैयायिके**भ्यो भिन्नमेव । अत एव तै**र्वृद्धनैयायिक**सम्मत-मुपमानमागम एवाऽन्तर्भावितम् । **साङ्ख्या वैशेषिका**श्चोपमानं प्रमाणतया स्वीकुर्वन्त्येव किन्तु न पृथक्तया । तत एव तेऽपि **प्राच्यनैयायिक**लक्षितमुपमानमागमेऽन्तर्भावयन्ति ।

(२) **प्राचीनै**र्लक्षितमतिदेशवाक्यं स्पष्टतयाऽऽगमरूपमेवेति **नव्यनैयायिकै**रुपमानस्याऽन्यल्लक्षणं कृतम् । तदनुसारमतिदेशवाक्यं श्रुत्वाऽरण्यं गतस्य सारूप्यदर्शनं भवति – अर्थाद् गोसदृशगवयदर्शनं भवति । ततश्च सञ्ज्ञा-सञ्ज्ञिसम्बन्धप्रतिपत्तिर्भवति – अर्थादयं गवयपदवाच्य इति प्रतीतिर्भवति । प्रतीतिरेषोपमानस्य फलमस्ति । अत एव सारूप्यदर्शनस्य करणत्वादुपमानस्य प्रमाणत्वम् – इति **नव्यैः** प्रतिपादितम् । एतत्तूपमानमागमेऽन्तर्भावयितुमशक्य-मासीत् । अत उपमानस्य पृथक् प्रामाण्यममन्वानैः **साङ्ख्यै**स्तदनुमाने एवा-ऽन्तर्भावितम्[१७] ।

नवीनकृतं लक्षणं **बौद्धः शान्तरक्षितो**ऽपि न सद् मन्यते । स कथयति यद् – अतिदेशवाक्ये श्रुते एव समाख्यासम्बन्धप्रतिपत्तिर्भवति । अत एव

---

१७. योऽप्ययं 'गवयशब्दो गोसदृशस्य वाचकः' इति प्रत्ययः सोऽप्यनुमानमेव । यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचकः, यथा गोशब्दो गोत्वस्य, प्रयुज्यते चैव गवयशब्दो गोसदृशे इति तस्यैव वाचक इति तज्ज्ञानमनुमानमेव । **साङ्ख्यतत्त्वकौमुदी** का० ५ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गवयदर्शनानन्तरं तत्स्वीकारे तस्य गृहीतग्राहित्वात् स्मृतिवदुपमानमपि प्रमाणं नैव भवेत्[१८]। स एवमपि वदति यद् - यदि उपमानस्य प्रामाण्यं स्वीकर्तव्यमेव तदा न स्वातन्त्र्येण, किन्तु तस्याऽनुमानेऽन्तर्भावं[१९] कृत्वैव कर्तव्यम् ।

**जैन**व्याख्याकारेण **सिद्धर्षिगणि**नाऽपि तदनुमाने एवाऽन्तर्भावितम्[२०]। **प्रमालक्ष्म**कारेणाऽपि तदनुमाने एवाऽन्तर्भावितम्[२१]। विवेकस्त्वयं यत् तेन **मीमांसक**सम्मतमुपमानमनुमानान्तर्गततया स्वीकृतम् । तथा **नैयायिक**-सम्मत**मुपमान**मधिगतग्राहित्वात् न प्रमाणमिति **शान्तरक्षित**स्येव स्वीकृतम् ।[२१]

(३) **जैनाचार्यै**रुपमानं प्रत्यभिज्ञानाभिधपरोक्षप्रमाणान्तर्गततया स्वीकृतमस्ति । यथोर्ध्वतासामान्यं[२२] विषयीकृत्य 'स एवाऽय' मिति सङ्कलनात्मकः प्रत्ययो भवति, तथैव तिर्यक्सामान्यं[२३] विषयीकृत्य 'तत्सदृशोऽय'मिति सङ्कलनात्मकः प्रत्ययो भवति । **जैनाचार्याणां** मतेनाऽन्येऽपि सङ्कलनात्मकाः प्रत्यया भवन्ति, यथा- 'इदमस्माद् दूरं - ह्रस्व'मित्यादि । एते सर्वेऽपि सङ्कलनात्मकाः प्रत्ययाः प्रत्यभिज्ञाने एवाऽन्तर्भवन्ति ।

(४) **वाचस्पतिमिश्रेण साङ्ख्यतत्त्वकौमुद्यां मीमांसक**-सम्मतमुपमानं प्रत्यक्षेऽन्तर्भावितम् । यदाह स- 'यत् तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षमेव । अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम् । न हि अन्यद् गवि सादृश्यमन्यच्च गवये । भूयोऽवयवसामान्ययोगो हि जात्यन्तरवर्ती जात्यन्तरे सादृश्यमुच्यते । सामान्ययोगश्चैकः । स चेद् गवये प्रत्यक्षो गव्यपि तथा ।' (का० ५)

3. उपमानस्य पृथक् प्रामाण्यं **नैयायिकानां मीमांसकानां** चाऽभीष्टम् । **वेदान्त**दर्शनं व्यवहारे **भट्टनय**मनुसरत्यतस्तस्याऽपि पृथक् प्रामाण्यमेवेष्टम् । एतदतिरिच्य नाऽन्यत्र दर्शने पृथक् प्रामाण्यं स्वीकृतम् ।

---

१८. **तत्त्वसंग्रहकारिका** १५६४-६५ ।

१९. **तत्त्वसंग्रह का०** १५७५-७६ ॥

२०. **न्यायावतारटीका** पृ. २० ।

२१. **प्रमालक्ष्म कारिका** - ३१६, ३३४ ।

२२. कुण्डलकटकादिपूर्वापरपर्यायानुगामि सुवर्णादिद्रव्य**मूर्ध्वतासामान्यम्** ।

२३. विभिन्नदेशकालस्थितानां घटादिव्यक्तीनां सदृशाकारपरिणामलक्षणं घटत्वादिसामान्यं **तिर्यक्सामान्यम्** ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

4. आचार्यप्रवरैरु**मास्वातिभि**रुपमानस्य विचारो **नयवाद**रूपया जैनदृष्ट्या कृतोऽस्त्यतस्तन्मतेनोपमानं प्रमाणं भवेदपि नाऽपि भवेत्। [२४]एतैर्यदा प्रमाणस्य प्रत्यक्ष-परोक्षाख्यौ द्वौ भेदौ प्रतिपाद्य मत्यादिज्ञानानि[२५] तयोरेव समाविष्टानि तदा प्रश्नोऽयमुत्थितो यद् **नैयायिका**दिसम्मतानि तथा [२६]**भगवत्यादिषु** जैनशास्त्रेषु निर्दिष्टानि प्रत्यक्षानुमानोपमानागमाख्यानि चत्वारि चत्वारि प्रमाणानि एतौ च द्वौ भेदौ कथं समन्वेतव्यौ ? आचार्यैरुत्तरितं यदेतानि चत्वार्यपि मति-श्रुतज्ञानयोः समावेष्टव्यानि । अर्थात् प्रत्यक्षानुमानोपमानानि मतिज्ञाने आगमप्रमाणं च श्रुतेऽन्तर्भावनीयानि । एतेनेदं फलितं भवति यत् चत्वार्यपि प्रमाणानि परोक्षप्रमाणस्यैवाऽन्तर्गतानि । प्रस्तुते चोपमानप्रमाणं परोक्षं मतिज्ञानं चाऽस्ति ।

**जैन**दृष्ट्या सम्यग्दृष्टिजीवस्यैव मतिज्ञानं ज्ञानमत एव च प्रमाणम् । तथा मिथ्यादृष्टिजीवस्य मतिज्ञानमज्ञानं ततश्चाऽप्रमाणम् । एतदनुसारेण **उमास्वातिभिः** प्रतिपादितं यन्निर्दिष्टानि चत्वार्यपि प्रमाणानि मिथ्यादृष्टि-परिगृहीतत्वादप्रमाणान्येव[२७] । ततश्चोपमानं यदि मिथ्यादृष्टेः स्यात् तदा तदप्रमाणमेव ।

दृष्ट्यन्तरेणाऽपि आचार्या विषयमिमं विचारयन्ति । ते कथयन्ति यत् **शब्दनया**नुसारेण न कोऽपि जीवो मिथ्यादृष्टिरज्ञो वा भवति । तद्दृष्ट्या सर्वाण्यपि ज्ञानानि प्रमाणान्येव[२८] । ततश्चोपमानमपि प्रस्तुते प्रमाणमेव ।

### ३. उपमानस्य फलम् –

उपमानफलविषयकोऽपि विवादो दर्शनेषु दृश्यते । उल्लेखनीयो मतभेदो **नैयायिक-मीमांसक**योरस्ति ।

---

२४. **तत्त्वार्थभाष्यम्** १.१३ ।

२५. मति-श्रुता-ऽवधि-मनःपर्यव-केवलज्ञानानि पञ्च ।

२६. **भगवती** ५.४ ।

२७. अप्रमाणान्येव वा । कुतः ? मिथ्यादर्शनपरिग्रहात्, विपरीतोपदेशाच्च । **तत्त्वार्थभाष्यम्** १.१३ ॥

२८. चेतना-ज्ञस्वाभाव्याच्च सर्वजीवानां नाऽस्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते, तस्मादपि विपर्ययान् न श्रयत इति । अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति ॥ **तत्त्वार्थभाष्यम्** १.३५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र **नैयायिका**स्तावद् उपमितिं सञ्ज्ञिसम्बन्धप्रतीतिरूपां मन्यन्ते । अर्थादतिदेशवाक्यश्रवणानन्तरमरण्यं गतवतः पुरुषस्य 'अयं गवयपदवाच्यः' इति या प्रतीतिर्भवति सैवोपमानस्य फलमस्तीति तन्मतम् । किन्तु **मीमांसका** हि नैवं मन्यन्ते । ते कथयन्ति यत् – न ह्युपमानस्य फलं समाख्यासम्बन्धप्रतीतिः, अपि तु परोक्षगवि गवयसादृश्यस्य यज्ज्ञानमर्थाद् 'मद्गृहगतो गौर्गवयसदृशः' इति ज्ञानं भवति तदेवोपमानस्य फलम् । ततश्चोपमितिर्नाम नैव सञ्ज्ञा-सञ्ज्ञिसम्बन्धप्रतीतिरूपा किन्तु परोक्षवस्तुविषयकं सादृश्यज्ञानमेवोपमितिरिति सण्टङ्कः ।

तदेवं निरूपिता **उपमानप्रमाणस्य** स्वरूप-प्रामाण्य-फलान्याश्रित्य दार्शनिकानां मतभेदाः ॥

( आधारग्रन्थः – **न्यायावतारवार्तिक-टिप्पणानि** )

**एके केचिद् यतिकरगतास्तुम्बिकाः पात्रलीलां**
**गायन्त्यन्ये सरसमधुरं शुद्धवंशे विलग्नाः ।**
**अन्ये केचिद् ग्रथितसुगुणा दुस्तरं तारयन्ते**
**तेषां मध्ये ज्वलितहृदया रक्तमन्ये पिबन्ति ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# अद्भुतो विजयः

मुनिरत्नकीर्तिविजयः

कलिङ्गदेशस्य बालराज्ञी अमिता स्वकीयावासे दोलायामान्दोलयन्ती निश्चिन्तमुपविष्टाऽऽसीत् । आपादमस्तकं स्फारशृङ्गारा सा सामन्दमितस्ततो निरीक्षमाणाऽऽसीत् । सहसैव तस्या दृष्टिराकाशे पतिता । सुदूरं कृष्णमेघानां मध्येऽग्ने रक्तज्वाला विद्युदिव प्रकाशमानाः सा दृष्टवती ।

सविस्मयमासन्नवर्तिनं वृद्धं कञ्चुकिनं सा पृष्टवती - भोः ! किमेतत् ?

भगवति ! अप्रत्याशितो भयानकः सङ्कटः कश्चिदापतितोऽस्ति, अतः सुरक्षायै भवती अन्तरागच्छतु - स उक्तवान् ।

किन्तु वृद्धेन तेन निर्दिष्टं भयमप्यवगणय्य सा - अरे ! आगच्छतु, वयमलिन्दं गत्वा सर्वमेतत् पश्यामः - इति हसित्वोक्तवती ।

कथनेनाऽनेन सहैव साऽलिन्दं प्रति धावितवती । तया सह तस्याः शुनको बभ्रूरपि धावितवान् । अलिन्दमारुह्य सा दृष्टवती - समस्तेऽपि नगरे बहवो अट्टालिकाः करालाभिरग्निज्वालाभि वेष्टिता इवाऽऽसन् । गगनचुम्बिन्यो ज्वालाः सर्वत्र प्रसृता आसन् । असहायानां नगरजनानां चीत्काररवः श्रूयमाण आसीत् ।

दृश्यमेतद् दृष्ट्वा बलराज्ञी अमिता व्याकुला विह्वला च जाता - किमेतत् प्रवर्तते ? को नामाऽस्माकं प्रजा लुण्टयति ? - इति ।

सेनापतिः सोमनाथो राजमहालये मगधसैन्येन सह युद्धाय मन्त्रणां कृत्वा व्यूहं रचयन्नासीत् । बालराज्ञीमन्वेषयन्तः कतिपयसैनिका अलिन्दमागताः । बालराज्ञी कञ्चुकिनं पृच्छन्त्यासीत् - भोः ! कथयतु नाम कः प्रजाः सन्तापयति ? तासु भयं कः प्रसारयति ? कथयतु रे ! किमर्थं मूक इव स्थितोऽस्ति ?

कञ्चुकी सखेदमुक्तवान् - भगवति ! महत्यापत्तिः समुपस्थिताऽस्ति । चलतु, वयं गुप्तावासमाश्रयामः ।

न हि, न हि, प्रथमं तावत् कथयतु नाम यत् कोऽयमस्माकं नगरजनानेवं पीडयति ? कश्च तेषां गृहाणि दहति ? - बालराज्ञी पृष्टवती ।

महाराज्ञि ! स दुष्टः अशोकः प्रजा लुण्टयति । क्रूरः शिशूनपि हन्ति । अतश्चलतु, वयं गर्भगृहं गच्छामः - राज्ञ्या हस्तं गृहीत्वा कञ्चुकी कथितवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वकीयं हस्तं मोचयन्ती अमिता कथितवती - न हि, तं दुष्टमशोकं बध्नातु। किमर्थं स जनान् पीडयति हन्ति वा ?

कञ्चुकी बालराज्ञीं हस्ताभ्यामुन्नीय प्रोक्तवान् - भगवति ! गुप्तावासमाश्रयतु नाम । अशोकः स राक्षस इव क्रूरोऽस्ति । न कोऽपि तं बद्धुमलमस्ति ।

किमर्थम् ? किमर्थं न शक्यं तस्य बन्धनम् ? कुत्राऽस्ति महामात्यः ?

भगवति ! अस्माकं कलिङ्गसेना पराजिताऽस्ति । महामात्योऽपि सङ्गरे मृत्युमाप्तवान् ।

कस्तं हतवान् रे ! - बालराज्ञी पृष्टवती ।

देवि ! स दुष्टोऽशोक एव तं हतवान् । भवती कृपया शीघ्रं राजप्रासाद-मागच्छतु। राजमाता भवतीमाह्वयति - कञ्चुकी विह्वलः सन्नुक्तवान् ।

तावताऽधस्ताद् राजमातुः स्वरः समागतः - वत्से ! अमिते ! शीघ्रमागच्छतु - इति ।

किन्तु, अलिन्दं स्थिता बालराज्ञी हठादधोगमनं निवारितवती । तस्याः परितो भ्रमन्तं सक्रोधं च भषन्तं बभ्रूं दृष्ट्वा तत्समीपगमने सैनिका अपि बिभ्यति स्म ।

पुनश्च हठाद् बालराज्ञी कथितवती - वयं तमशोकं ग्रहीष्याम एव ! कञ्चुकिन् ! शुनकस्य शृङ्खलां ममाऽर्पयतु । तया हि वयं तं लुण्टाकमशोकं भन्त्स्यामः ।

अत्र च राजमहालयस्य समीप एव घोरं युद्धं प्रवर्तमानमासीत् । शत्रुसैन्यस्य विजयं दृष्ट्वा कञ्चुकी शुनकस्य शृङ्खलां तस्या हस्ते समर्पितवान् । तावत् सेनापतिसोमनाथस्य ध्वनिः श्रुतः - महाराज्ञि ! त्वरयतु कृपया ।

सैनिका उपरिष्टादेव प्रत्युत्तरितवन्तः महालये आगमनं निषेधति देवी । सा हि शृङ्खलां गृहीत्वा अशोकं बद्धुं जिगमिषति - इति ।

तस्मिन्नेव समये शत्रुसैनिकाः कलिङ्गस्य राजप्रासादे स्वकीयाधिपत्यं स्थापयन्तस्तेषां सेनापतिना गोपालेन सह महालये प्रविष्टवन्तः । तदा च सेनापतिगोपालेन ध्वनिः श्रुतः - महाराज्ञी शृङ्खलया अशोकं बद्धुं गच्छतीति । किन्तु स तं सत्यं नाऽमन्यत । किन्तु पुनः कलिङ्गसैनिकानां कथनं तत्कर्णगोचरीभूतं —



Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाराज्ञी अशोकं निग्रहीतुं गच्छतीति ।

अतो मगधसेनापतिर्गोपालस्ततः प्रतिनिवृत्तः । शस्त्रसज्जैः सैनिकैः परिवृतं राजप्रासादे च प्रविशन्तं अशोकं साभिवादनं स विज्ञप्तवान् - जयोऽस्तु महाराजस्य ! अद्याऽपि महाभयं विद्यते । अतः सावधानो भवतु - इति ।

अजेयस्य अशोकस्य कस्माद् भयं विद्यते सेनापते !? - सक्रोधं अशोकः पृष्टवान् ।

भयभीतः सेनापतिरुक्तवान् - महाराज ! कलिङ्गस्योन्मत्ता महाराज्ञी भवद्बन्धनाय शृङ्खलां गृहीत्वाऽऽगच्छति ।

अशोकस्तिरस्कारपूर्वकमुक्तवान् - रे ! किमेतावताऽपि तस्या गर्वः खण्डितो न जातः ? चलन्तु, एषोऽजेयः अशोकस्तं खण्डयिष्यति । अग्रे भवतु - इति ।

सैनिक-दास्यदिभिः परिवृता अमिता राजमहालयस्य सोपानान्युत्तीर्य बहिः परिसरं प्राप्तवती । सेनापतिः राजमाता च तस्या बोधनाय गुप्तावासं नयनाय च बहु प्रायतताम् । किन्तु निषेधमुखं मस्तकं धूनयन्ती सा दृढमुक्तवती - नैव नैव, मां माऽवरुन्धन्तु । अहं तं दुष्टं अशोकं बद्ध्वैव विरंस्यामि । स दुष्टोऽस्ति । अहं तं निग्रहीष्याम्येव - इति ।

तावता भारतवर्षस्य चक्रवर्ती अशोकस्तत्र समागतवान् । सैनिकैः स परिवेष्टित इवाऽऽसीत् । खड्गहस्तस्य तस्य खड्गस्य मुष्टिरपि विविधजातीयै रत्नैर्मण्डिताऽऽसीत् । अशोकं समागतं दृष्ट्वा सेनापतिः सोमनाथः, राजमाता सैनिकाश्च स्तब्धा इव जाताः । निरुच्छ्वासा इव ते सञ्जाताः । किन्तु अमिता तु निर्भयमग्रे गच्छन्ती आसीत् । बालराज्ञीयं व्याघ्रमुखं प्रविशतीव सर्वेऽप्यनुभूतवन्तः । अशोकस्य लक्ष्यमितोऽपि अमितां प्रति न गतमासीत् । अमिताऽपि तं न पूर्वं कदापि दृष्टवत्यासीत् ।

सहसैव सा पृष्टवती - कोऽस्ति भवान् ?

प्रश्नेनाऽनेनाऽनया सर्वनाश आमन्त्रित इति मन्वानाः सर्वेऽपि क्षणं दिङ्मूढा इव जाताः । अशोकोऽपि बालराज्ञीमेतां प्रति तीक्ष्णदृष्ट्या द्रष्टुं लग्नः ।

किन्तु तस्यैतादृश्या दृष्ट्याऽप्यविचलिता अमिता पुनरुक्तवती - को भवान् ! सुन्दराकृतिः खलु ! भवतो वस्त्राण्यपि मनोहराणि ! अहा ! खड्गोऽपि किलाऽद्भुतः !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चलतु, भवानप्यस्माभिः सहैव चलतु । वयं तं दुष्टमशोकं निग्रहीतुं गच्छामः ! – एवं कथयन्ती सा हस्तस्थितां शृङ्खलां दर्शितवती ।

अशोकस्तु मौनं स्थिरमेव स्थित आसीत् । तं तथास्वरूपं दृष्ट्वा सखेदं अमिताऽवदत्- अरे ! भवानस्माकमादेशं न स्वीकरोति ? सर्वैरप्यस्माकमादेशः पालनीय एव । अहं कलिङ्गस्य महाराज्ञी प्रजानां च माताऽस्मि । अस्माभिः सहाऽऽगच्छतु, अशोकं निगृह्य प्रत्यागच्छामः ।

अशोकः सविस्मयं पृष्टवान् – किम् ? त्वमेव कलिङ्गस्य महाराज्ञी ?

आम्, अहमेव कलिङ्गस्य महाराज्ञी । वयं तं क्रूरमशोकं निजिघृक्षामः । यतः स प्रजाः पीडयति, निर्दोषान् नगरजनान् हन्ति । भवानपि सहायको भवतु !

विजयी सम्राट् पुनः क्षणद्वयं काष्ठवन्निश्चलो जातः । तं तथा स्थिरं दृष्ट्वा साश्चर्यं अमिता पृष्टवती – अरे ! को भवान् ? किमर्थमेवं स्थितोऽस्ति ? किमर्थं च किमपि न वदति ?

मन्त्रमुग्धः सन् अशोको मन्दमुक्तवान् – अहं सम्राड् अशोकोऽस्मि !

किम् ? भवानेव अशोकः ? भवान् तु सुन्दररूपवान् किल ! किमर्थं भवान् प्रजा एवं परिदेवयति ! किमभिलषितं भवतः ?

अशोकः पुनः स्थिरो निरुत्तरश्च स्थितः ।

अमिता अशोकं प्रति पदद्वयमग्रे गत्वा कथितवती – किं भवतः सकाशे भोजनायाऽन्नं नाऽस्ति ? वस्त्राणि किं न सन्ति ? किं क्रीडनकानि न सन्ति ? किमिच्छति भवान् ? अत्र सर्वमप्यस्ति । वयं सर्वं भवते दास्यामः । आगच्छतु ! – इत्युक्त्वा सा अशोकस्य हस्तं गृहीत्वा तं नीतवती । सम्राड् अशोकोऽपि पालित इव तामनुसृतवान् । सर्वेऽपि राजभवनं प्राप्तवन्तः । तत्र च सर्वत्र स्थितं धनराशिं संदर्श्य अशोकमुद्दिश्य – कथयतु नाम, काऽपेक्षा भवतः ? अपेक्षितं सर्वमपि गृह्णातु । अत्र सर्वमस्ति । अहं भवते तत्सर्वमपि दास्यामि यदपि भवदभिलषितं स्यात्; परं भवता न कोऽपि लुण्ट्यः, न भयं प्रापणीयः, न च कोऽपि हननीयः – इत्युक्तवती ।

इदानीं मगधसम्राट् सर्वथा विवशोऽसहाय इव परिदृश्यते स्म । स हि तूष्णीमेव स्थित आसीत् । विचारतुमुलं चित्ते समुद्भूतं – समस्तपृथ्वी-विजयप्रतिज्ञोऽहमशोकः किमस्या बालिकायाः प्रश्नैः पराजितो भविष्यामि ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विजययात्रेयं किमत्रैव समाप्स्यति ? इति । भ्रमोऽयं ममेति विचार्य स मस्तकं बलाद् व्यधूनयत् । किञ्चिद् विचार्य राजसिंहासनं प्रत्यङ्गुलिनिर्देशेनोक्तवान् - वयं कलिङ्गस्य राजसिंहासनमिच्छामः ।

श्रुत्वैतद् अमिता चिन्तिता जाता । किन्तु पञ्चषनिमेषैरेव प्रत्युत्तरितवती - अस्तु, यद्येतद् भवदभिलषितं तर्हि गृह्णातु । भवतः सकाशे राजसिंहासनं नाऽस्ति खलु ? भवतु, भवतु, भवानेतद् गृह्णातु । वयमन्यद् निर्मास्यामः ।

मगधाधिपतिः स्तब्धो जातः । युद्धे द्विलक्षसैनिकानां रुधिरेणाऽप्यप्लावितं सुर्वणमण्डितेन लौहकवचेनाऽऽवृतं तस्य हृदयमस्या बालिकाया निर्दोषैः वचनैरार्द्रमभूत् । स्वखड्गं स भूमौ क्षिप्तवान् । अमितां च कलिङ्गस्य बालराज्ञीं हस्ताभ्यामुन्नीय हृदयसात् कृतवान् । उक्तवांश्च —

'भो ! महाराज्ञि ! विजय्यप्येष मगधेश्वरोऽद्य पराजितोऽस्ति । अद्य तव जयोऽभवत् ।' -इत्युक्त्वा तद्हस्ताच्छृङ्खलां गृहीत्वा स्वगले क्षिप्तवान् - देवि ! सम्राडशोकोऽयं तव बन्धकोऽस्ति । यथेच्छमादिशतु । किं भवतीच्छति ?

नहि नहि, न वयं किमप्यभिलषामः - पुलकिता राज्ञी कथितवती ।

एवं सत्यपि बन्धकाय अशोकाय किमप्यादिशतु ।

अस्तु, अस्माकमादेशोऽस्ति यदतः परं न कोऽपि सन्तापनीय, न लुण्टनीयः, नाऽपि च हन्तव्यः - बालराज्ञी सोत्साहं कथितवती ।

सम्राड् अशोकोऽयमद्य प्रतिजानीते यदतः परं न कमपि सन्तापयिष्यति, न भापयिष्यति न च हनिष्यति । हिंसया युद्धेन वा न विजयी भविष्यति, अपि तु स्नेहेनैव सर्वेषां प्राणिनां हृदयानि विजेष्यति ! - इति मगधसम्राड् उक्तवान् !

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# स्पर्शमणि:

**मू. झवेरचंद मेघाणी**
अनु० **रत्नकीर्तिविजयः**

मथुराया वृन्दावनप्रदेशः । अस्खलितप्रवाहा यमुना मन्दं प्रवहन्त्यासीत् । तस्यास्तीरे सनातनः ऋषिर्भगवन्नामस्मरणलीन उपविष्ट आसीत् । तदा किल कश्चिद् दरिद्रो ब्राह्मण आगत्य ऋषिचरणमभिवन्दितवान् ।

'भाग्यवन् ! कुत आगतवानस्ति ? कः परिचयो भवतः ? – ऋषिः पृष्टवान् ।

ब्राह्मण उक्तवान् – दूरदेशान्तरादागतोऽस्मि भगवन् ! मम व्यथाकथा हि कथमपि वर्णयितुं न शक्या । ईश्वरोपासनानिरतोऽहं कदाचिद् रात्रौ स्वप्नमेकं दृष्टवान् । देवः कश्चिद् मां निर्दिष्टवान् यद् – 'उपयमुनं सनातनगोस्वामिनामा साधुरस्ति । तं गत्वा याच्यताम् । स हि तव दुःखं निवारयिष्यति' – इति ।

ऋषिरवदत् – वत्स ! यद्यपि श्रद्धयाऽऽशया च त्वमागतोऽसि । किन्तु किमहं दास्ये ? यदप्यासीत् तत् सर्वमपि परित्यज्य सर्वथा रिक्तोऽहं संसारान्निर्गतोऽस्मि । तथाऽपि तिष्ठ ! किञ्चित् स्मर्यते ! हां ! कदाचित् कस्मैचिदप्युपयोगी भविष्यतीति कृत्वा स्पर्शमणिं कञ्चिदहं तत्र वालुकानामधो निगूहितवानासम् । तं च त्वं गृहाण । स तव दारिद्र्यमपहरिष्यति । विपुलं धनमपि भवान् प्राप्स्यति ।

'आहा ! स्पर्शमणिः ?' ब्राह्मणः स धावन्निव ऋषिनिर्दिष्टं स्थानं प्राप्तवान् । वालुकानामधस्ताच्च तं मणिं बहिः कृष्टवान् । मणेः स्पर्शमात्रेणैव तस्य लौहमयोऽपि रक्षाकरण्डः (AMULET) सुवर्णमयः सञ्जातः । तेनाऽऽनन्दितः स नर्तितुं प्रवृत्तः । बहु नृत्तं तेन । नृत्यन्नेव स कल्पनाकाशे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

डयितुं लग्नः - कीदृशं कियन्तं वा वैभवमेतेनाऽहं प्राप्स्यामि ! कथं वा तमुपभोक्ष्यामि - इत्यादि। पश्चात् श्रान्तः स विश्रान्त्यर्थं नद्यास्तीरे उपविष्टः। यमुनायाः प्रवहणस्य मधुरं गानं श्रुत्वा स शान्तो जातः। परितो विस्तीर्णां हसतामिव पुष्पाणां मनोहराणां च वृक्षाणां शोभां स निरीक्षितवान्। पक्षिणामानन्दमयं कलरवमपि स श्रुतवान्। समक्षमेव जायमानं सूर्यास्तमपि दृष्टवान्।

ब्राह्मणस्य तस्य चित्तं दोलायमानमासीत्। एकत्र तं परितः शोभमानं निसर्गमाकर्षयति स्म, अन्यत्र च मणिप्रभावेन प्राप्स्यमानं वैभवमाकर्षयति स्म। सनातनगोस्वामी तस्य स्मृतिपथमायातः। बहु चिन्तितं तेन। विचारप्रवाहस्तस्य परिवृत्तो जातः।

धावन्निव स ब्राह्मणः ऋषिमागत्य पादौ पतितवान्। साश्रुलोचनः स गद्गदस्वरेणोक्तवान् - "अपारसमृद्धिदायकं मणिमपि यो मृदमिव मत्वा दत्तवान् तस्य चरणरज एव पर्याप्तं मम। नैतेन मणिना किमपि प्रयोजनं मम" - कथयता स तं मणिं गभीरे जले क्षिप्तवान्।

दानं ग्रहणं चोभयमपि तत्र सफलं जातम्।

*कार्यार्थी भजते लोको न कश्चित् कस्यचित् प्रियः।*
*वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम्॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# अन्तरम्

**मुनिधर्मकीर्तिविजयः**

भावनगरराज्यस्य महाराजः कस्यचित् साधुमहात्मनो दर्शनार्थं गतवान् । साधोः समीपे आसीनस्य तस्य राज्ञो दृष्टिः साधोः वस्त्रस्योपरि पतिता । तद् वस्त्रमतिकलात्मकं स्यूतमासीत् । सौचिकोऽपि समीपे एवाऽऽसीनः ।

राजा पृष्टवान् - भो ! तन्तुवाय ! किमेतद् वस्त्रं भवता स्यूतम् ?

आम्, इत्युक्तं सौचिकेन ।

राजोक्तवान् - एतादृशं वस्त्रं सीवित्व मह्यमपि देयम् । अपेक्षानुरूपं मूल्यं दास्यामि ।

सौचिक आह- राजन् ! भवतः कृते यत् कार्यं तत्तु उच्चतममेव करणीयम्, न काऽपि चिन्ता कार्या ।

उत्साहेन निपुणबुद्ध्या च कलात्मकं वस्त्रं प्रगुणीकृत्य राज्ञे प्रदत्तवान् सौचिकः ।

राज्ञा दृष्टं तद् वस्त्रम् । प्रसन्नतामनुभवतः सतोऽपि राज्ञश्चित्तं न पूर्णतस्तुष्टिं प्राप्तम् । ततो राजोवाच- भो ! वस्त्रं तु कलात्मकं सीवितं, किन्तु साधोस्तस्य वस्त्रेण सदृशं नैतत् प्रतिभाति ।

सौचिकः प्रोक्तवान् - अन्नदातर् ! अत्र कलया सह मम हृदयस्य प्रेमाऽपि मीलितमस्ति । तादृशं प्रेम तु पुनः कथं जागृयात् ?

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# बुद्धिः सर्वार्थसाधिका

**मुनित्रैलोक्यमण्डनविजयः**

"मन्त्रीश्वर ! अस्माकं राज्ये अन्यधर्मिणामेकच्छत्रं साम्राज्यम् । जैनद्वेषिणस्ते जिनचैत्यं निर्मापयितुमुद्यतानस्मान् सर्वदा विविधप्रकारैः पीडयन्ति, त्रासयन्ति वारयन्ति च । राजशासनमपि तदनुकूलम् । वयं न प्रतीकारार्थं प्रभवामः । जिनदर्शनं विना सन्तप्यन्तेऽस्माकं हृदयानि । भवान् कृपया साहाय्यं ददातु ।" इत्यवदद् देवगिरित★ आगतः श्रावकसङ्घः ।

"भो बन्धवः ! साधर्मिकानां साहाय्यं मम कर्तव्यमेव । अहमवश्यं प्रयत्नं करिष्यामि । जिनालयास्तु मया बहवो निर्मापिताः, परमेतादृशे स्थले यदि जिनभवनं निर्माप्येत, तर्हि नूनं प्रभूतो लाभः स्यात् । कथमपि कार्यं साधयिष्यामि । भवन्त आश्वस्ता भवन्तु" इत्यवोचद् अवन्तिसाम्राज्यस्य□ महामन्त्री पेथडः ।

पश्चात् स स्वपुरुषान् देवगिरिं प्रेषयित्वा तत्रत्या वार्त्ताः सङ्गृहीतवान् । तत्र प्रमुखा अंशा इमे आसन्–देवगिरेः सम्पत्तिः प्रभूता । राज्यं धनधान्यैः पूर्णम् । राजा श्रीराम उत्तमः शासकः । अपारं सैन्यं तस्य । केवलं गजा एव द्वादशसहस्राः । महामन्त्री हेमाद्रिर्यद्यपि स्वभावत उत्तमः, किन्तु दानेऽत्यन्तकृपणः । राजशासने तस्य दृढं वर्चः । श्रावकैरुक्तमपि सर्वं सत्यमिति ।

मन्त्रीश्वरः पेथडः सर्वमालोच्य निर्णीतवान् यत् स्वकार्यसिद्ध्यै कथमपि हेमाद्रिः तोषणीयः । तस्य तोषणेन सर्वं सम्पत्स्यते । यद्यपि महर्द्धिकस्य तस्य स्वर्णमाणिक्यादिप्रदानादिभिः सरलैरुपायैः तुष्टिसम्पादनं शक्यं नाऽऽसीत्, तथापि मन्त्रीश्वरः स्वबुद्ध्याऽद्भुतमुपायं प्रकल्पितवान् ।

स देवगिरिराज्ये ॐकारनगरे एकं सत्रमारब्धवान् । सत्रेऽस्मिन् जायमानं महान्तं धनव्ययं यद्यपि पेथड एव निर्वहति स्म, तथापि यथा दानशौण्डत्वेन हेमाद्रेरेव यशः स्यात् तथा व्यवस्थां स कारितवानासीत् । अनेन हेमाद्रेः तोषणमपि स्यात्, स्वेन दानोद्भवं पुण्यमपि प्राप्येतेति मन्त्रीश्वरस्य चिन्तनमासीत् । तस्येयं युक्तिर्नूनं सफला जाता ।

★ इदानीमस्य पुरस्य नाम 'दोलताबाद' इति ।

□ अवन्तिसाम्राज्यस्य राजधानी तदानीं मण्डपदुर्ग (मांडवगढ/मांडु) आसीत् । अतः पेथडो मण्डपदुर्गस्य मन्त्रीत्यप्युत्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्रीश्वरः पेथडोऽस्मिन् सत्रागारे पथिकानां प्राकृतानां ब्राह्मणादीनां च कृते महादानुकूल्यं प्रकल्पितवानासीत्। आगता अत्र स्नानार्थं शुद्धं जलं, संवाहनार्थं पुरुषान्, परिधातुं वस्त्राणि च प्राप्नुवन्ति स्म। पश्चात् समीपस्थे जिनचैत्ये तैरर्हन्तं वन्दयित्वा उत्तमपात्रासनैस्ते भोज्यन्ते स्म। भोजने बहूनि पक्वान्नानि, प्रचुराणि शाकानि, नानाव्यञ्जनानि च भवन्ति स्म। ओदनादीनि स्वादिष्ठानि भवन्ति स्म। भोजनानन्तरं निद्रार्थं दिव्याः खट्वा दीयन्ते स्म। अहो! बत तत्रत्यव्यवस्थया प्रमुदिता नराः स्वगृहमपि विस्मरन्ति स्म! ''कः स पुण्यशाली, किंनामधेयः स वदान्यो येनैतदारब्ध''मित्यादि पृच्छतां पुरतस्तु हेमाद्रेरेव नाम कथ्यते स्म।

भुक्तप्रीता भट्टप्रभृतयो देवगिरिं गत्वा हेमाद्रिं भूरिशः स्तुतवन्तः। विविधैः श्लोकैस्तस्य प्रशस्तयो विरचिता जाताः। 'कलिकालकर्णः' 'भूमिस्थबलिराजः' इत्यादिरूपेण तस्य यशः सर्वत्र प्रसृतम्। आरम्भे तु हेमाद्रिणाऽसत्यं तत्सर्वमिति मत्वाऽवधानं न दत्तम्, परमेतत्तु नित्यमनुवृत्तम्, तदपि त्रिवर्षं यावत्। विस्मितो हेमाद्रिश्चिन्तितवान् – मया जन्मतोऽर्थिभ्यो गालिमन्तरेण किमपि न दत्तम्, पुनः का कथा सत्रागारस्य ? नूनं किमपि रहस्यं स्यात्। तदन्वेषणीयमेवेति।

परमन्वेषणार्थं प्रेषिता जना आगत्यैतदेवोक्तवन्तः–महामन्त्रिन्। तत्राऽऽगतः कोऽपि जनोऽसन्तुष्टीभूय भवत्प्रशंसामकृत्वा वा न निर्याति। एतावता द्रम्माणां सपादकोटीं व्ययितवता भवता नूनं महत्पुण्यमुपार्जितमस्तीति। हेमाद्रिः स्वयमेव रहस्यान्वेषणार्थं गतवान्। भूरिप्रयत्नैः स ज्ञातुं प्राभवद् यदवन्तिमन्त्रीश्वरः पेथड एतं सत्रागारं मन्नाम्ना निर्वहति। यदा लोकाः परधनेन स्वयश उपार्जयितुं प्रयतन्ते तदा मन्त्रीश्वरस्य स्वधनेन परख्यातिसम्पादनकार्यं तमाश्चर्यान्वितमकरोत्। स मन्त्रीश्वरं द्रष्टुमवन्तीं गतवान्। मन्त्रीश्वरोऽतीवसौहार्देन तस्य स्वागतं व्याहरत्।

''भवान् यत् कृतवान् तस्य रहस्यं न ज्ञायते'' इत्यवदद् हेमाद्रिर्मन्त्रीश्वरेण सह गोष्ठीकाले। मन्त्रीश्वरस्यौदार्येण स वशीकृत आसीत्।

''नाऽत्र किमपि रहस्यम्। भवान् देवगिरेर्महामात्यः, अहं चाऽवन्तेः, अत आवां बन्धू। यद्यपि भवान् स्वभावत उत्तमः, शासनसञ्चालने दक्षः, प्रजाया योगक्षेमनिर्वहणे उद्यतश्च तथाऽपि कुतश्चित् कारणात् स्वयं महर्द्धिकः सन्नपि दानं न करोतीत्यतो भवतोऽपकीर्तिर्भवति। बन्धोरपयशोऽहं सोढुं न शक्त इत्यतो विहितोऽयं प्रबन्धः'' इत्युक्तवान् पेथडः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अहो ! भवत उपकारवृत्तिः । नाऽस्योपकारस्याऽऽनृण्यं यास्यामि, तथाऽपि मदुचितं किमपि कार्यं दर्शयतु" सनिर्बन्धं हेमाद्रिराह ।

"यद्यविलम्बेन सिद्धिः स्यात्तदा कथयेयम् ।"

"सर्वं सम्पादयिष्याम्यर्थेन बलेन वा ।"

"देवगिरिपुर्यां जिनचैत्यार्थं योग्यां भूमिं दापयतु कृपया ।"

"अतीव दुष्करं कार्यं भवता दर्शितम् । तथाऽपि मयाऽङ्गीकृतमिति नृपेण दापयिष्यामि ।"

ततो हेमाद्रिः सपरीवारं मन्त्रीश्वरं देवगिरिपुरेऽनयत्, स्वकीये रम्ये हर्म्येऽस्थापयच्च । स्वयं च कार्यसिद्ध्यर्थमवसरं प्रतीक्षमाणस्तस्थौ ।

जाग्रति दैवे सर्वं स्वयमेव लभ्यते । अत्राऽप्येवमेव सञ्जातम् । पुरा कदाचिदश्वविक्रेतारो देवगिरिपुर्यामागतवन्त आसन् । तदा श्रीरामभूपः 'कोऽश्वो वस्तुतः क्रयणयोग्य' इति निर्णेतुमशक्नुवन् हेमाद्रिमाहूतवानासीत् । अमात्यः शालीहोत्रादिशास्त्रेषु विचक्षण आसीत् । ततः स सर्वान् हयान् वीक्ष्यैकं देवसत्त्वं जात्यमश्वमदर्शयत् । राज्ञा बहुमूल्येन क्रीतः सोऽश्वः स्वगुणै राज्ञो मोदं जनयन् राजाश्वो जातः । राजा सर्वदा तमेवाऽऽरुह्य विहारार्थं गच्छति स्म ।

एकदा तमारुह्यऽन्यपुरं व्रजतः सतो राज्ञो मार्गान्तरे पङ्किलो वाह आगतः । तत्र परं पारं गन्तुं भृशं प्रेरितोऽप्यश्वो वाहे नोदतरदतो नृपः कशया तस्य ताडनमारब्धवान् । 'जात्योऽप्ययं नीरात्कुतो बिभेती'ति चिन्तयन् कुशाग्रो महामन्त्री हयस्योच्चलन्तं पुच्छं दृष्ट्वा कारण ज्ञातवान् राजानं ताडनाद् निवारितवांश्च ।

"राजन् ! मा कार्षीदश्वराजस्याऽवमाननम् ।"

"तर्हि किं कुर्याम् ? अयं नीरादपि बिभेति चेत् समराङ्गणे किं करिष्यति ?"

"राजन् ! न बिभेत्ययम् । परमत्यन्तकुलीनत्वात् स्वभर्तुः प्रातिकूल्यं सर्वथा नेच्छतीत्येतादृशस्तस्य व्यवहारः । वाहे जलं किञ्चिद् गभीरमस्ति । अस्य पुच्छस्त्वतुच्छः । अतो वाहे गमनकालेऽस्य पुच्छच्छटाभिरुच्छलता मलिनेन जलेन भवतो वेशो दूषितो भूयादेव । तदसहमानोऽयं प्रवाहे पदं न दधाति ।"

"किमेतस्य प्रमाणम् ?"

"अस्य पुच्छः सन्नाहेन सह बध्यताम् । पश्चात् पश्यत्वयं गच्छत्युत न ?"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्ञा तथा कृते स तावच्छीघ्रतया परं पारं प्राप्तवान् यद् राज्ञाऽह-मुङ्डीयाऽऽगतवानित्यनुभूतम् । स यद्यपि हयोपर्यधिकः प्रसन्नो जात एव, तथापि हेमाद्रेर्हयाशयस्याऽवबोधस्तमतीवविस्मितमकरोत् । तुष्टः स मन्त्रिणं वरीतुमा-दिष्टवान् ।

"स्वामिन् ! भवत्कृपैव मम सर्वस्वम् । न तदधिकं किमपि याचे ।"

"किमप्यवश्यं व्रियताम् । मा मम वचनं निष्फलं कार्षीः ।"

"वदान्य ! मम बन्धुर्देवगिर्यां जिनचैत्यं निर्मापयितुमिच्छति । तत्कृते योग्यां भुवमर्पयतु ।"

"परं तत्र द्विजा विरोधं समुत्थापयिष्यन्ति ।"

"देवगिरौ कस्य शासनम् ? श्रीरामभूपस्य वा द्विजानां वा ?"

"किं मामुत्तेजयितुं प्रयतसे ?"

"न देव ! वस्तुस्थितिं ज्ञापयितुम् ।"

"अस्तु । मयाऽङ्गीकृतमेतद् भूमिदानम् । परं कः स बन्धुः ?"

"अवन्तिसाम्राज्यस्य महामन्त्री पेथडः । अधुना मम हर्म्ये प्रतिष्ठितोऽस्ति सः । श्वः प्रातः प्रभुप्रणत्यै स आगन्ता । अवन्तिपतिर्जयसिंहो बिम्बमात्रमेव । वस्तुतस्तु पेथड एव सत्ताधीशः । अतस्तस्य राजार्हं स्वागतमस्तु ।"

"तथैव भविष्यति ।"

परेद्युः पेथडः सप्राभृतं राजपर्षदि गतः । राजा तस्योचितं स्वागतं व्याहृत्योपहारैः सत्कृत्य च भूदानहेतवे तेन सह स्वयं सपरिच्छदः पुर्यन्तर्गतवान् । तत्र मन्त्रीश्वराय स्वाभिलषितां भूमिं सूचयितुं राज्ञा कथिते स नगरस्य हृदयस्थाने एकां विशालां भुवं दर्शितवान् । वचनपालनतत्परेण नृपेण तस्य चयनकुशलतां प्रशस्य सा भूमिः तस्मै प्रत्ता । सा भूमिः सप्तानां महेभ्यहर्म्याणां कृतेऽर्हाऽऽसीत् । मन्त्रीश्वरः सामोदं पुरीजनान् धनेन तोषितवान् महामहं कृतवान् च ।

अथ तद्भूमिस्थहट्टगृहादीन् पातयित्वा शुभेऽहनि खनितुमारब्धे तत्र स्वादु पानीयं प्रादुरभूत् । इदं भूमेरुत्कृष्टतासूचकं शुभचिह्नमासीत्, तथापि तत् कार्ये विघ्नविनायकं जातम् । यत एतद् ज्ञातवन्तो विघ्नसन्तोषिणो रामदेवस्य पार्श्वे तद्भूमौ विहारस्य स्थाने वापीं कारयितुं विज्ञपितवन्तः । वापीकरणेन कियान् लाभः, कियच्च प्रजाया आनुकूल्यं तद् भूयो भूयः प्रस्तुतवन्तस्ते । पूर्निपानेषु स्वादु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलं न लभ्यते स्म, ततः कर्णदुर्बलो राजा तां विज्ञप्तिमङ्गीकृतवान् । परेद्युः प्रातः स्वयं तज्जलं परीक्ष्य निर्णयं प्रकाशयिष्यामीति तेन कथितमासीत् ।

इतः पेथडेन यः कदाचित् प्रीणित आसीत् स नृपनापित एतां वार्त्तां तस्मै अजिज्ञपत् । अतर्किततयोपस्थितेनाऽप्येतद्विकटसङ्कटेन मन्त्रीश्वरो न विह्वलीभूतः, किन्तु बुद्धिवैभवेन युक्तिं रचितवान् । स तस्यां रात्रौ धनेन द्वारपालं प्रलोभ्य भृत्यानां द्वारा नगरान्तराद् लवणस्यूतानानायितवान् । तद् लवणं वारिणि निक्षेप्य जलं क्षारीकृतवांश्च । पश्चादसौ निलयमागत्य सुखं सुष्वाप ।

प्रगे राजा तत्राऽऽगत्य स्वयं तज्जलमास्वादयामास । क्षारेण समुद्रजल-मप्यतिशयानं जलं स थूदकरोत् । दुष्टैर्मत्सरेण मृषाऽभाषीति मन्यमानोऽसौ तान् सम्यक् तर्जितवान् । महत्सङ्कटमेवमपगतम् ।

इदानीं मन्त्रीश्वरो निपुणं सूत्रधारं मार्गयितुं लग्नः, परं पुण्यवशात् सोऽपि स्वयमेवाऽमिलत्, सोऽपि पुनः कलायामद्वितीयोऽद्वितीयं जैनचैत्यं निर्मातुं कृतप्रतिज्ञश्चाऽऽसीत् । प्रतिज्ञाप्रबन्धस्त्वेवम् - यो रुद्रमहालयं निर्मितवान् तं सूत्रधारं सिद्धराजोऽन्धीकृतवानासीत् - मा भूदेतादृशं द्वितीयमिति धिया । ततो जातरोषः स सूत्रधारः तदतिशायिनं जिनचैत्यं निर्मातुं प्रतिज्ञां कृतवान्, परं तावद् व्ययं कर्तुं समर्थः कोऽपि न लब्ध इत्यतोऽपूर्णप्रतिज्ञः स मरणकाले स्वपुत्रेण सन्धां ग्राहितवान् । इत्थं त्रिषु वंश्येषु सा सन्धा चलिता । तदनु पञ्चमवंश्यो रत्नाकरोऽपि गृहीतसन्धः नव्यमिव तद्वैरं धारयन् जातः । तादृशस्य महर्द्धिक-स्याऽन्वेषणार्थं भ्रामं भ्राममसौ सौभाग्येन मन्त्रीश्वरेण साकममिलत् । प्रमुदितमना मन्त्रीश्वरो भूरिहेमकरभ्यादिना तस्य सत्कारं विधाय विहारनिर्माणे तस्य नियुक्तिं कृतवान् सर्वाण्यावश्यकसाधनानि पूरितवांश्च । धनव्ययस्य चिन्तां सर्वथाऽकृत्वा उत्तमोत्तमनिर्माणे एव मतिर्देयेति तेन सूत्रधारः सूचितः ।

अन्ते यच्चैत्यं जातं तत् त्रिजगत्यामेवाऽद्भुतमासीत् । चतुरशीतिचैत्यानां निर्माणे यावान् व्ययः स्यात् तावान् व्ययोऽस्मिन्नेकस्मिन्नेव चैत्ये जातः । चैत्यस्य प्रत्येकमङ्गमनुपमममभूद् । मन्त्रीश्वरः पेथडो महताऽऽडम्बरेण महामहेन च तत्रा-ऽऽरासणाश्मनिर्मितायाः त्र्यशीत्यङ्गुलमानायाः श्रीवीरप्रतिमायाः प्रतिष्ठामकरोत् ।

देवगिरिजैनसङ्घस्यैकैका व्यक्तिरवर्णनीयमानन्दमन्वभवत् ।

प्रासादस्योत्तुङ्गशिखरोपरि वीज्यमाना वैजयन्ती मन्त्रीश्वरस्य शाश्वतां कीर्तिमभिव्यनक्ति स्म ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कथा

# शिष्यपरीक्षा

सा. धृतियशाश्रीः

एकस्य गुरोर्द्वौ शिष्यौ आस्ताम्। स गुरुस्ताभ्यां सदृशीं शिक्षामयच्छत्। एकदा गुरुणा चिन्तितम् – 'अनयोर्द्वयोर्मध्यात् कस्मै आचार्यपदं दीयेत ?' तेन गुरुणा तयोर्द्वयोः परीक्षा कृता। एकदोद्यानमध्ये आम्रवृक्षसमीपे गुरुर्द्वौ शिष्यौ नीत्वा ताभ्यां कथितवान् –

'एतस्मिन् वृक्षे के के गुणाः सन्ति इति कथ्यताम्।'

प्रथमशिष्यः प्राह – 'एष वृक्षस्स्वस्वभावेन फलति फलं च यच्छति। अपरं कमपि गुणमहं न जानामि' इति।

गुरुणा द्वितीयः शिष्यः पृष्टः।

द्वितीयशिष्योऽपि प्राह– 'अस्य वृक्षस्य बहवः गुणाः सन्ति।

स आतपं सहित्वाऽन्यस्मै छायां ददाति।

तं प्रति यदि कोऽपि ग्रावाणमपि क्षिपेत् तस्मै अपि सः फलं यच्छति।

तस्योपरि बहुफलानि भवन्ति तथापि सः नम्रीभवति।

इत्यादयोऽनेके गुणाः सन्ति किन्तु सर्वानपि वक्तुं न शक्नोति'।

शिष्यस्योत्तरं श्रुत्वा हृष्टो गुरुस्तमेवाऽऽचार्यपदाधिरूढं कृतवान्।

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# सत्यवती

**डो. आचार्यरामकिशोर मिश्रः**

सत्यवती कान्यकुब्जराजगाधेः पुत्र्यासीत् । ऋषिणा ऋचीकेन सा विवाहिता । बहुकालानन्तरं यदा तस्याः सन्तानोत्पत्तिर्नाऽभवत्तदा सा स्वपतिं प्रार्थयामास – भगवन् ! ममोत्पत्तेरनन्तरं मे मातरि विवाहानन्तरञ्च मयि न कोऽपि सन्तानो जातः । अतः कोऽपीदृश उपायः कार्यो भवता, येनाऽऽवयोर्वंशवर्धकबालौ जायेयाताम् । स्वपत्न्याः प्रार्थनया सेवया च प्रसन्नेनर्षिणा ऋचीकेन पुत्रोत्पत्तिमन्त्रेणाऽभिमन्त्रितो यज्ञियचरुः स्वपत्न्यै सत्यवत्यै दत्तः, कथिता च सा – देवि सत्यवति ! शृणु, एष यज्ञियो दिव्यचरुर्भागद्वये विभक्तोऽस्ति । अस्य भक्षणेन यथेष्टपुत्रप्राप्तिर्भविष्यति । अतोऽस्य प्रथमभागं त्वं भक्षय, द्वितीयभागं च स्वमात्रे भक्षणाय प्रदेहि । अस्य प्रथमभागस्य भक्षणेन त्वं ब्राह्मणशक्तिसम्पन्नं पुत्रं जनयिष्यसि, द्वितीयभागभक्षणेन च तव मातरि क्षत्रियशक्तिसम्पन्नस्तेजस्वी पुत्र उत्पत्स्यते ।

यज्ञियचरुं दत्त्वा महर्षिः ऋचीको वनं तप्तुं जगाम । दैवयोगात्तदानीमेव महाराजगाधिरपि तीर्थदर्शनप्रसङ्गात्स्वपत्न्या सह स्वपुत्र्याः सत्यवत्याः कुशलतां प्रष्टुमृचीकाऽऽश्रममाजगाम । सत्यवती यज्ञियचरोर्भागद्वयमपि स्वजनन्यै समर्पितवती । 'यज्ञियचरुभक्षणेन पुत्रोत्पत्तिर्भविष्यती'तिज्ञात्वा गाधिपत्न्या प्रथमं चरोः प्रथमभागो भक्षितः । ततः सत्यवत्या द्वितीयभागो भक्षितः । ऋषिनिर्मितचरुभक्षणप्रभावोऽक्षुण्ण आसीत् । अतो गाधिपत्नी सत्यवती च ते द्वे अपि गर्भवत्यौ बभूवतुः ।

गाधिपत्नी यं पुत्रमसूत, स विश्वरथनामा कान्यकुब्जस्य राजा बभूव, यः पश्चाद् ब्राह्मणशक्तिसम्पन्नो महर्षिविश्वामित्रोऽभवत् । सत्यवती यं पुत्रमजनयत् स क्षत्रियशक्तिसम्पन्नो महर्षिजमदग्निरासीत्, यस्य पुत्रो महर्षिपरशुरामो बभूव । विश्वामित्रो जमदग्निजनन्याः सत्यवत्याः सहोदरोऽनुज आसीत्, यो जमदग्नेर्मातुलो बभूव । सत्यवत्याः प्रयत्नेन विश्वामित्रोऽजायत । स ऋग्वेदस्य सूक्तकारोऽस्ति, यो गायत्रीमन्त्रं व्यरचत् –



Jain Education International For Private & Personal Use Only www.jainelibrary.org



'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ ऋग्वेदः - ३/६२/१०

सत्यवत्याः पुत्रो जमदग्निरपि ऋग्वेदस्य सूक्तकारोऽस्ति, येन परमात्मविषये लिखितम्-

तुभ्येमा भुवना कवे ! महिम्ने सोम तस्थिरे ।
तुभ्यमर्षन्ति सिन्धवः ॥ ऋग्वेदः ९/६२/२७

एतौ द्वौ विश्वामित्रो जमदग्निश्च ऋग्वेदस्य सूक्तकारौ स्तः । विश्वामित्रस्य ऋग्वेदे ५० पञ्चाशत्सूक्तानि प्राप्यन्ते, यथा - ३/१-१२, २४-३०, ३२-६२ = ५० । जमदग्निना ऋग्वेदे ५ पञ्च सूक्तानि विरचितानि, यथा - ८/१०१, ९/६२, ६७, १०/१११, १६७ । सत्यवती विश्वामित्रस्य भगिनी जमदग्नेश्च जनन्यासीत् ॥

२९५/१४, पट्टीरामपुरम्,
खेकड़ा (बागपत) उ.प्र. २५०१०१

*पीयूषमिव सन्तोषं पिबतां निर्वृतिः परा ।*
*दुःखं निरन्तरं पुंसामसन्तोषवतां सदा ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ससइ-पुन्वोः प्रणयकथा

डॉ. कान्तिभाई गोरः
कुलपतिः कच्छ युनिवर्सिटी, विश्वविद्यालय, भूज

## भूमिका

ससइ-पुन्वोः प्रणयकथा कच्छप्रदेशे सिन्धप्रदेशे च विख्याताऽस्ति ।

सिन्धप्रदेशस्य भंभोरनामके नगरे रजकदम्पती निवसतः स्म । कदाचिदेतौ दम्पती सिन्धुनद्यास्तीरे वस्त्राणि क्षालयन्तावास्ताम् । तदा हि नदीप्रवाहे प्रवहन्ती काचिद् मञ्जूषा तौ दृष्टवन्तौ । तां च ततो निष्कास्य यदा तावुद्घाटितवन्तौ तदा नवजाता बालिका काचिदन्तर्दृष्टा । निःसन्तानत्वात् तामेव पुत्रीं कृत्वा तस्या लालनं पालनं च तौ प्रेम्णा कृतवन्तौ । तस्या रूपमनुपममासीदतस्तस्याः 'ससइ' इति नाम तौ दत्तवन्तौ । रजकश्च स राज्ञः प्रीतिपात्रमासीत् । ससइरपि बुद्धिमत्यासीत् । भंभोरनगरेऽन्यस्थलेभ्यो यत्किमपि वस्तुजातं नीयमानमासीत् तदुपरि नगरशुल्कं ग्रहीतव्यमासीत् । तत्कार्यार्थं च बुद्धिमत्त्वाद् राजा ससइं नियुक्तवानासीत् ।

अत्रान्तरे सिन्धप्रदेशस्य समीपवर्ती केचमकराण-प्रदेशो दुष्कालग्रस्तो जातः । अतस्तत्रत्येन राज्ञा आरीजामेन मकराणप्रदेशस्य क्रय्यद्रव्याणि विक्रेतुं सिन्धप्रदेशाच्च धान्यं क्रेतुमुष्ट्राणामनेकशतं प्रेषितम् । नगरशुल्कं प्रदातुमागतो राजपुत्रः ससइं दृष्टवान् । उभावपि परस्परं मोहं प्राप्तवन्तौ । किन्तु 'रजकपुत्री एषा । अनया सह विवाहो न कर्तव्यः' इति सहाऽऽगतेन सचिवेन वारितोऽपि राजपुत्रः पुनुः स्वनिर्णयान्न चलितः । अतः पुनुं भंभोरनगरे एव विहाय सचिवेन प्रतिगन्तव्यमभवत् ।

अत्र च ससय्या रजकपिता एवं पणमुक्तवान् यद्-यदि पुनुः ससय्या सह विवाहोत्सुकस्तर्हि तेन रजकत्वमङ्गीकरणीयम् । पुनुरेतदप्यङ्गीकृतवान् । ससय्या



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सह परिणीय स रजकघट्टे वस्त्राणि क्षालयितुं प्रवृत्तः ।

केचमकराणस्थितः पुनोः पिता यदैतज्ज्ञातवान् तदा कुपितो जातः । येन केनाऽपि प्रकारेण पुनुरत्राऽऽनेतव्य एवेति पुनोर्भ्रातॄन् सचिवं चाऽऽदिश्य भंभोरं प्रेषितवान् । किन्तु कथमपि पुनुस्तेषां वचनं नाऽङ्गीकृतवान् । अतस्तस्य भ्रातरस्तमपहृत्य नेतुं निर्णीतवन्तः । रात्रौ च रङ्गशालायां सर्वेऽपि सुरापानार्थमेकत्र जाताः । पुनुं च तेऽधिकं सुरापाणं कारितवन्तो येन स मदेन मन्दसंज्ञ इव सञ्जातः । तदवस्थं च तं उन्नीय ते उष्ट्रेन केचमकराणं प्रति प्रस्थितवन्तः ।

प्रातश्च यदा ससइर्जागृता तदा पुनुं तत्परिजनांश्चाऽदृष्ट्वा विह्वला जाता । पुनुं च मार्गयितुं सा निर्गता । भ्रामं भ्रामं क्लान्ता सा मार्गे एव पतिता । पवनप्रेरिताभिर्वालुकाभिस्तस्याः समग्रमपि शरीरमाच्छादितमिव जातम् । केवलं तस्या उत्तरप्रावारकस्य प्रान्तभाग एव बहिर्दृश्यते स्म ।

इतश्च पुनुर्यदा प्राप्तसंज्ञो जातस्तदा स्थितिं ज्ञातवान् । स चाऽवसरं प्राप्य भ्रातॄणां सार्थात् पलायनं कृतवान् । भ्रामं भ्रामं सोऽपि ससय्या देहो यत्र पतित आसीत् तत्राऽऽगतः । तस्या वस्त्रप्रान्तेन तामुपलक्ष्य विरहव्यथितस्तत्रैव दिवं गतः ।

▣

## पात्राणि

| | |
|---|---|
| १. रजकः | |
| २. रजकी | |
| ३. ससइः | |
| ४. अरिजामः | केचमकराणप्रदेशस्य राजा |
| ५. ज्येष्ठभ्राता | आरिजामस्य ज्येष्ठपुत्रः |
| ६. पुनुः | आरिजामस्य कनीयान् पुत्रः |
| ७. सचिवः | |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दृश्यम् ( १ )

**रजकः** अधुना अस्माकं कार्ये तव चित्तं नास्ति । किं चिन्तयसि ? त्वरां कुरु ।

**रजकी** व्यर्थं जीवनम् अस्माकम् । किमर्थं जनानां वस्त्राणि वयं प्रक्षालयामः ?

**रजकः** उदरभरणार्थं सर्वे जनाः किंचिदपि प्रवृत्तिं कुर्वन्ति । वयमपि तेन कारणेन अस्माकं कुलपरम्परानुप्राप्तं वस्त्रप्रक्षालनकार्यं कर्तुम् अत्र सिन्धुनदीतट-मागताः । आश्चर्यमनुभवामि यद् उदासीनचित्ता त्वं तव कार्यं न करोषि । केन कारणेन इत्थं शोकाकुला भूत्वा वस्त्राणि न प्रक्षालयसि ?

**रजकी** चिन्तयामि आवयोः निधनस्य पश्चात् कोऽपि नास्ति योऽस्माकं कुलपरम्परायाः वहनं कुर्यात् । सर्वप्रकारेण उत्तमं सुखं दत्तं दैवेन तथाऽपि संततिविहीनं जीवनं व्यर्थम् । न जानामि कस्य पापस्य फलमिदम् ।

**रजकः** अहो वृथा प्रलपसि । बलीयसी केवलमीश्वरेच्छा । सन्ततिः अपि सर्वदा सुखस्य कारणं न भवति । तस्मादलं शोकेन ।

**रजकी** सत्यं भणति भवान् । किं वृथा प्रलापेन । (उच्चैः) पश्यतु पश्यतु भवान्, नदीप्रवाहे किंचिद् दृश्यते । पटलिकासदृशं किंचिद्वस्तु जलवेगेन सह तरति ।

**रजकः** पश्यामि । कुरु तव कार्यम् । सरिताजले बहवः पदार्थाः दृश्यन्ते । अलम् अवलोकनेन । किमर्थं व्यर्थं कालक्षयं करोषि ?

**रजकी** पटलिका अस्ति । सरिताजले बहवः पदार्थाः दृश्यन्ते किन्तु पटलिका न दृश्यते । अहं गच्छामि जलमध्ये । यावत् तं पदार्थं न पश्यामि तावत् जलमध्ये हि तिष्ठामि ।

**रजकः** अयि, तिष्ठ, तिष्ठ, अहमेव जले अवतरामि । सत्यमुक्तं केनचिद् यत् स्त्रीदुराग्रहस्य नास्त्युपायः । अहो जलप्रवेगः । अतीव शीतले जले तरणमपि दुष्करम् ।

**रजकी** (स्वगतम्) अहो अनर्थः कृतः मया (उच्चैः) अतीव जलप्रवेगः तस्माद् जलाद् बहिर्निर्गच्छ । नेच्छामि पटलिकाम् । त्वरया निवर्ततात् ।

**रजकः** मा आक्रोश । गृहीता मया पटलिका ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रजकी** वार्धक्येऽपि प्रबलवेगे मम प्रेमानुग्रहकारणेन तरति । पटलिकां गृहीत्वा आगच्छति । सत्या मे अवधारणा । किम् अस्ति तस्यां पटलिकायाम् ?

**रजकः** पश्य, पश्य, उत्तमकाष्ठेन निर्मितां कलाकौशल्यपूर्वकम् अलंकृताम् इमां पटलिकाम् । मन्ये द्रव्येन पूर्णा अस्ति पटलिका ।

**रजकी** अहमेव पश्यामि । अहो धन्या खल्वहम् ! ईश्वरेण दत्ता मह्यम् अतीव रूपसम्पन्ना पुत्री ।

**रजकः** पुत्री ! किं जल्पसि ? जानासि का सा ? नदीजले वहन्त्यां पटलिकायां प्राप्ता नवजाता बालिका आवयोः पुत्री ? विचारय, किमर्थं प्रलपसि ? सत्वरं गृहं गमनं हि उचितम् । तस्मात् त्वरां कुरु ।

**रजकी** मम पुत्रीं पश्य । देवकृपया प्राप्ता सा । (बालिकायाः रुदनं श्रूयते) मम पुत्रि ! मा आक्रन्द । अहमेव तव माता, अलम् आक्रन्दनेन । अहो किं किं करोमि ? केनाऽप्युपायेन मम पुत्री शान्ता न भवति ।

**रजकः** यदि कोऽपि जनः आगमिष्यति राज्ञे निवेदनं वा करिष्यति ततः किं करिष्यावहे ? तस्मात् गृहं प्रति गमनं हि श्रेयस्करं भविष्यति । त्वरां कुरु ।

**रजकी** हुं सत्यं वदति भवान् । गृहं गत्वा दुहित्रे दुग्धपानप्रबन्धं करिष्ये । तस्मात् भवानपि त्वरां करोतु । आहूय उत्तमं ब्राह्मणं तस्मै किंचिद् दक्षिणामपि यच्छामः ।

**रजकः** बाढम्, बाढम् । अहं सर्वं प्रबन्धं करिष्ये । तस्यै क्रीडनार्थं क्रीडनकान्यपि आनयामि ।

## दृश्यम् ( २ )

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**ज्येष्ठभ्राता** सचिव, प्राप्तः दुर्भिक्षः । मम पिता महाराजः आरिजामः व्याधिग्रस्तः । तेन आदिष्टेऽहं भवता सह मन्त्रयामि । सर्वे जनाः दुःखिताः । अस्माकं कोशागारे अक्षयं धनं, रत्नानि, मौक्तिकानि, सुवर्णालङ्काराः सन्ति तथापि धान्याभावेन वयं सर्वे अतीव दुःखिताः । दर्शय उपायम् । केनोपायेन दुष्कालसमयः सुखेन यापयितुं शक्येत तत् दर्शय । तव



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार्गदर्शनम् अमूल्यम् । पूर्वमपि वयं महत्तराम् आपत्तिं तव मार्गदर्शनेनैव पारं गताः । विचक्षणबुद्धिः खलु त्वम् । तस्माद् उचितं पथदर्शनं कुरु । तस्य प्रबन्धोऽपि त्वया कर्तव्यः ।

**सचिवः** राजन्, यस्मिन् काले भिक्षा अपि दुष्प्राप्या भवेत् सः कालः दुर्भिक्षः उच्यते । अस्माकं समीपे सिन्धप्रदेशः वर्तते, तस्मिन्देशे वहति सिन्धुनदी । तस्याः जलेन अयं देशः धनधान्येन समृद्धः । सार्थवाहदलं सिन्धदेशं प्रति प्रेषयामः ।

**ज्येष्ठभ्राता** किमर्थम् ?

**सचिवः** अस्माकं देशस्य वस्तूनां विक्रयार्थं धान्यस्य च ग्रहणार्थं सार्थवाहदलं सिन्धदेशं प्रति प्रेषयामः ।

**ज्येष्ठभ्राता** साधु ! साधु ! सम्यग्दर्शितम् । दुष्कालस्य प्रभावः दुस्सहनीयः भवेत्, तत्पूर्वं धान्यव्यवस्थापनं कुरु । व्यापारकुशलाधिकारिजनानां नियुक्तिं कुरु, सार्थवाहैः सह तानपि प्रेषय ।

**सचिवः** यथा आदिशति महाराजः ।

**पुनुंः** अहमपि सार्थवाहेभ्यः सिन्धदेशं गन्तुम् इच्छामि ।

**ज्येष्ठभ्राता** कुमार ! विना प्रयोजनेन किमर्थं देशाटनम् ?

**पुनुंः** देशाटनेन ज्ञानवृद्धिर्भवति । स्वपराक्रमपरीक्षार्थम्, आत्मनिरीक्षणार्थं, धनप्राप्तिहेतोः, मैत्रीहेतोः परदेशगमनं नीतिनिपुणा अनुमोदयन्ति ।

**सचिवः** साधु, साधु, पुनुंकुमारेण नीतिसारः कथितः । राजन्, प्रेषय सार्थवाहेन सह कुमारम् । अलं चिन्तया, अहमपि गच्छामि राजकुमारेण सह । तस्मादाज्ञापयतु भवान् ।

**आरिजामः** सचिव, तव वचने विश्वासं कृत्वा निक्षेपरूपेण मम पुत्रं त्वया सह प्रेषयामि । मम न्यासं मत्वा तस्य रक्षणं तव कर्तव्यम् ।

**सचिवः** देव, मा चिन्तां कुरु । महाशौर्यवान् पुनुंकुमारः मम रक्षणं कर्तुमपि समर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दृश्यम् (३)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**पुनुं:** सिन्धप्रदेशस्य अस्य नगरस्य अवर्णनीया शोभा मे मनो हरति । ईदृशी विशाला सरिता अपि पूर्वं मया न दृष्टा । मन्ये अस्य नगरस्य जना अपि सिन्धुनदीव प्रेमपूर्णाः सन्ति । सचिव ! व्यापारप्रारम्भे किमस्माकं प्रथमं कर्तव्यम् ?

**सचिव:** पुनुंकुमार ! विक्रयार्थमानीतपण्योपरि प्रवेशशुल्कं दातुं शुक्लाध्यक्षा-समीपम् अहं गमिष्यामि ।

**पुनुं:** अहमपि भवता सह गच्छामि । किन्तु 'शुल्काध्यक्षा' श्रुत्वा आश्चर्यमनुभवामि । किं स्त्री अपि अस्मिन्नगरे शुल्काध्यक्षरूपेण कार्यं करोति ?

**सचिव:** आम् । श्रूयते ससइनामधेया काऽपि अतीव कुशला गुणसम्पन्ना रजककन्या शुल्काध्यक्षपदे तस्वगुणप्रभावेण राज्ञः कृपया नियुक्ता ।

**पुनुं:** शुल्काध्यक्षस्य दुष्करं पुरुषकार्यं कर्तुं समर्थां तां द्रष्टुमहमत्यन्तम् उत्सुकः ।

**सचिव:** तव औत्सुक्यं मे चिन्ताकारणं भवति ।

**पुनुं:** प्रहेलिकां रचयति भवान् । स्पष्टकथनमिच्छामि ।

**सचिव:** तां दृष्ट्वा तव औत्सुक्यभावः प्रणयभावे परिवर्तयिष्यते इति मे शङ्का ।

**पुनुं:** अहो ! अतीव रसिकजनः खलु भवान् ।

## दृश्यम् (४)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**ससइ:** कस्माद् देशात् भवान् आगतः ? किमानीतं विक्रयार्थं भवता ?

**पुनुं:** (स्वगतम्) अहो रूपम् ! नेदं मानुषीरूपम् ! स्वर्गादागता अप्सरा संभवत्येषा ! नहि नहि अप्सरा ह्यत्र किमर्थमागच्छेत् । अप्सरसः आगमनस्य किमपि कारणं नास्ति । तत् का स्यात् सा ? अहो अस्याः स्वरमाधुर्यम् !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ससइः** (पुनुं प्रति) भवन्तं पृच्छामि । किमर्थं भवानत्र सम्प्राप्तः ? यदि शुल्कदानार्थं भवानत्र सम्प्राप्तः तर्हि पण्यपदार्थान् दर्शय । शृणोति भवान् ? अहो किमपि न शृणोति अयं जनः । किं करोम्यधुना ?

**सचिवः** पुनुंकुमार ! ओ पुनुंकुमार ! अरे ध्यानस्थयोगिन् ! नेदं स्थलं तपःस्थानं न च त्वं संसारमुक्तो योगी । तदपि कं देवं स्मरसि त्वम् ? वा कामपि देवीम्....

**पुनुंः** देवी ! का देवी ? नहि नहि अत्रैवाऽहम् । सचिव ! दर्शयतु पण्यपदार्थान् शुल्कं च यच्छतु ।

**ससइः** (स्वगतम्) अहो पौरुषयुक्तः स्वरः । कामदेवसमः प्रभावकः अयं पुरुषः । न दृष्टः पूर्वं कोऽपि येन मम मनः एवम् आकृष्टम् ।

**सचिवः** अयि शुल्काधिकारिणि ! यच्छामि शुल्कद्रव्यम् । अहो सा अपि समाधिस्था । ओ देवि ! अहो किमपि न शृणोति सा !

**ससइः** क आक्रोशति ? मां वदति भवान् ?

**सचिवः** नहि नहि आकाशभाषितम् ! ओ शुल्काधिकारिणि, शुल्कार्थं धनं गृहीत्वा प्रतीक्षमाणोऽहं वदामि । शून्यमनस्कभावेन स्थिता भवती एकं शब्दमपि न शृणोति !

**ससइः** क्षम्यताम् ! चञ्चलस्य मे मनसः प्रभावेण इदमभवत् ! कस्माद् देशाद् आगतः भवान् ?

**पुनुंः** केचमकराणदेशाद् आगता वयम् । अहम्.....

**सचिवः** सा मां पृच्छति । अहं केचमकराणदेशाधिपतेः आरिजामस्य सचिवः । अयम् आरिजामस्य पुत्रः पुनुंकुमारः ।

**पुनुंः** भवती अपि स्वपरिचयं दत्त्वा अस्मासु अनुग्रहं करिष्यति ।

**ससइः** अहं रजकपुत्री....

**पुनुंः** न मन्ये । स्वर्गाद् आगता काचिदप्सरा असि त्वम् ।

**सचिवः** पुनुंकुमार ! अहं गच्छामि । सार्थवाहसमूहस्य भोजननिवासादिव्यवस्थां कर्तुं मम गमनम् अनिवार्यमस्ति । अनुज्ञामिच्छामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुनुं:** यद् इच्छति भवान् । अहमपि क्षणार्धेन आगच्छामि । केन अभिधानेन अस्य नगरस्य जना: भवतीं संबोधयन्ति ?

**ससइ:** ससइ मे अभिधानम् ।

**पुनुं:** हं ससइ । शशिवदना । भवतीं प्राप्य शशिवदना नाम सार्थकम् अभवत् ।

**ससइ:** अलं प्रशंसया । अतीव चतुर: वाक्पटु: च दृश्यते भवान् ।

**पुनुं:** पश्यतु । आगच्छन्ति माम् अन्वेष्टुं मम सेवका: तत: गच्छामि पुनरागमनाय ।

**ससइ:** वयमपि प्रतीक्षामहे ।

## दृश्यम् (५)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**सचिव:** पुनुंकुमार ! सार्थवाहकार्यं सम्पन्नम् । क्रीतम् आवश्यकं धान्यम् । प्रात:काले वयम् अस्माकं देशं प्रति प्रस्थानं करिष्याम: । कुमार ! किम् अभवत् ? उत्तरं देहि । जानामि तां रजककन्यां चिन्तयसि त्वम् । विस्मर अधुना ताम् । सा रजककन्या, त्वं राजकुमार: तस्मात् तां विस्मर ।

**पुनुं:** न आगच्छाम्यहं भवता सह । कथं विस्मरामि ताम् ? तस्या विना जीवनं व्यर्थम् । सा हि मम जीवनम् ।

**सचिव:** कुमार ! स्वकुलगौरवं विस्मरसि त्वम् । सा त्वया सह परिणयार्थं न युक्ता । उत्तमवंशोत्पन्नां कन्यां वयमन्विष्याम: ।

**पुनुं:** एकैव कन्या मया सह परिणयार्थं निर्मिता । सैव शशिवदना । अत्रैवाऽहं स्थास्यामि । देहं पातयामि वा कार्यं साधयामि । भवान् सार्थवाहसमूहेन सह गच्छतु ।

**सचिव:** आगच्छ मया सह । तेन रजकेन सह अहं मन्त्रयिष्ये ।

**पुनुं:** अहो त्वमेव मम परमशुभेच्छक: । अस्मिन्विदेशे पितृतुल्यो हितरक्षक: । अपरं च...



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचिवः जानामि जानामि । आगच्छ मया सह ।

## दृश्यम् (६)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

रजकः शृणोषि ? केऽपि अपरिचितजनाः अत्र आगच्छन्ति । राजपुरुषा इव दृश्यन्ते ।

रजकी अतिथिदेवो भव । वयं स्वागतं करिष्यामः ।

सचिवः पूर्वपरिचयं विना वयमत्रागता आगमनस्य पूर्वसूचनमपि न प्रेषितं मया । समयाभावेन कृतोऽपराधः । क्षमायोग्यमिदम् । तस्मात् भवान् क्षमताम् ।

रजकः सज्जनानाम् आतिथ्यलाभः महापुण्येन भवति । केन महापुरुषेण सह मम सम्भाषणं भवति ?

सचिवः अहं केचमकराणदेशस्य अधिपतेः आरिजाममहाराजस्य सचिवः, अयं आरिजाममहाराजस्य राजकुमारः पुनुंराजः, अन्ये सर्वे अस्माकमनुचराः ।

रजकी अहो धन्याः खलु वयम् । युष्माकमागमनेन पवित्रम् अभवद् गृहम् ।

रजकः आज्ञापयतु भवान् । प्रीत्यर्थं कामपि सेवां कर्तुमिच्छामि ।

सचिवः पुनुंकुमारेण सह पाणिग्रहणार्थं भवतः सुतायाः करमिच्छामि । रूपसम्पन्नः अस्माकं कुमारः अपि तस्याः प्रेमभाजनम् ।

रजकी किन्तु दुहितुः विदेशगमनं मह्यं न रोचते ।

रजकः तस्याः बाल्यात् प्रभृति इदं निर्धारितं यत् तस्याः विवाहसम्बन्धः स्वजातिमध्ये वयं करिष्यामहे ।

सचिवः कुमार ! अधुना स्वदेशं प्रति गमनं हि योग्यं भवेत् ।

पुनुंः किमर्थम् ईदृशः दुराग्रहः ?

रजकी यः जनः रजको भूत्वा अस्मिन् नगरे स्थातुं तत्परः तेन सह तस्याः विवाहसम्बन्धः संभवति ।

पुनुंः अहं रजको भूत्वा अस्मिन् नगरे स्थातुं वचनबद्धः ।

सचिवः पुनुंकुमार ! न भवान् उपयुक्तं भणति । स्वगौरवं विचारय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुनुः** मम जीवनं च गौरवं च सा शशिवदना अस्ति । तां प्राप्तुं किमपि कर्तुमहं तत्परः ।

**सचिवः** तस्याः हेतोः त्वं रजककर्माऽपि करिष्यसि ? नगरजनानां वस्त्राण्यपि क्षालयिष्यसि ?

**पुनुः** तस्याः स्नेहं प्राप्तुं किमपि कर्तुमहं दृढनिश्चयः ।

**सचिवः** अहो मूर्खः, स्त्रीलोलुपः । गच्छाम्यहम् । स्वदेशं गत्वा इदं सर्वं तव पित्रे भ्रातृभ्यश्च निवेदयामि ।

## दृश्यम् (७)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**ज्येष्ठभ्राता** सचिव, तव श्रद्धया मम भ्राता त्वया सह प्रेषितः ।

**सचिवः** क्षम्यतां देव ! रजककन्यामोहपाशेन बद्धः सः तत्र नगरे एव स्थितः ।

**ज्येष्ठभ्राता** किं करोति सः अधुना ?

**सचिवः** तत्र स्थित्वा रजककर्म करोति । नगरजनानां वस्त्राणि क्षालयति ।

**ज्येष्ठभ्राता** अहो कुलकलङ्क ! अहं त्वया सह आगच्छामि । विश्वासपात्रान् सैनिकान् आह्वय ।

**सचिवः** यथा आदिशति महाराजः ।

**ज्येष्ठभ्राता** केनाऽप्युपायेन तम् आनेष्याम्यहम् । यदि कोऽप्युपायो न भविष्यति तर्हि बलात् तं वयमानेष्यामः ।

## दृश्यम् (८)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**पुनुः** ससइ, ओ ससइ ! अत्र आगच्छ ।

**ससइ** किम् अस्ति ? किमर्थमाक्रोशति भवान् ?

**पुनुः** मम ज्येष्ठः भ्राता कुटुम्बस्य इतरजनाः च अत्र आगताः ।

**ससइः** अहो ! प्रणमामि सर्वान् जनान् । प्रणमामि ज्येष्ठं भ्रातरम् ।

**ज्येष्ठभ्राता** शुभं भवतु । पुनुं ! तव कुशलमङ्गलं ज्ञातुं वयमत्रागताः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुनुं:** उपकृतोऽस्मि । अतीव आनन्देन किञ्चिदपि वक्तुमहं न समर्थः । ससइ, भोजनप्रबन्धं कुरु ।

**ससइ:** शीघ्रं हि भोजनार्थं सर्वान् आह्वयामि । तावत् सर्वे कुर्वन्तु विश्रामम् ।

**ज्येष्ठभ्राता** पुनुं ! अहम् इच्छामि यत् त्वम् अस्माभिः सह स्वदेशमागच्छ ।

**पुनुं:** भ्रातः वचनबद्धः खल्वहम् । तां विहाय अहं न आगच्छामि । रजककर्म त्यक्तुमपि अहं न समर्थः ।

**ज्येष्ठभ्राता** बाढम् । अद्य रात्रौ तव लग्नोत्सवनिमित्तं वयं सर्वे मिलित्वा आनन्दपूर्वकं मद्यपानं करिष्यामः ।

## दृश्यम् (९)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**ज्येष्ठभ्राता** पुनुं ! अतीव प्रसन्ना वयम् । कुरु मद्यपानम् ।

**पुनुं:** अत्यधिकं पीतं मया । अधुना न शक्यम् ।

**सचिव:** एकं सुरापात्रम् ! मम मानार्थम् । स्वीकारं कुरु । अहो अतीव समर्थः खलु भवान् ।

**पुनुं:** बाढम् एकं पात्रम् । नहि, नहि अधुना मम देहः शिथिलः भवति ।

**ज्येष्ठभ्राता** पुनुं, अतीव आनन्देन यच्छामि । एकं सुरापात्रम् ! एकमेव !

**पुनुं:** यच्छ, अहो न पश्यामि किमपि ! अहो शुभरात्रिः ! शुभरात्रिः !

**ज्यष्ठभ्राता** मद्यपानप्रभावेण लुप्तसंज्ञः अयं जनः ! सचिव, त्वरया पुनुंकुमारं गृहीत्वा वयं सर्वे गच्छामः मन्ये सर्वं कृतं मया ।

**सचिवः** उष्ट्रचालकाः सर्वे प्रयाणार्थं तत्पराः । पुनुंकुमारस्य भार्या तस्याः च सर्वे सम्बन्धिनः अपि निद्रां प्राप्ताः । भवान् अपि बहिरागच्छतु ।

**ज्येष्ठभ्राता** कुमारम् नीत्वा अद्य मध्यरात्रौ प्रस्थातुं हि अनुकूलं भवेत् । यदा स्वस्थः भविष्यति तदा आत्मानं स्वदेशे द्रक्ष्यति ।

## दृश्यम् (१०)

(दृश्यपरिवर्तनसूचनार्थं संगीतम्)

**ससइ:** कुत्र गताः सर्वे ? ज्येष्ठभ्राता अपि न दृश्यते ! परिवारजना अपि न



